वर्षम् 72
अङ्कः -11
भाद्रपदमासः
विक्रमाब्दः 2079
युगाब्दः 5124
सितम्बर, 2022

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



डॉ. सर्वपल्ली राधाकृष्णन्
( 5 सितम्बर 1888 - 17 अप्रेल 1975 )

पूर्वराष्ट्रपतिः सोऽयं राधाकृष्णन् महामनाः ।
जयन्ती यस्य मासेऽस्मिन् श्लाघ्यते देशवासिभिः ।।

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | पाठकप्रतिक्रिया | प्रोफेसर डॉ. योगिनी व्यासः | ५ |
| ३ | तव कथामृतम् | आचार्यः पं.नथमलशास्त्री दाधीचः | ६ |
| ४ | गोपाङ्गनावैभवमहाकाव्यम् | डॉ. प्रमोदकुमारशर्मा | ९ |
| ५ | सन्तोष एव पुरुषस्य परं निधानम् | डॉ. योगिनी हिमांशु व्यासः | ११ |
| ६ | उत्थिते शार्ङ्गपाणौ | डॉ. हर्षदेवमाधवः | १३ |
| ७ | नारदभक्तिसूत्रवर्णनम् | युगलकिशोरभारद्वाजः | १४ |
| ८ | श्रीगणेशतत्त्वम् | डॉ. कैलाशचन्दबुनकरः | १५ |
| ९ | लघुशब्देन्दुशेखरस्य ........ | श्रीमती उषा शर्मा | १७ |
| १० | वैदिकसाहित्ये राष्ट्रियैकतायाः सन्दर्भाः | डॉ. मनीषकुमारशर्मा | २० |
| ११ | व्याकरणाध्ययनस्य महत्त्वम् | जन्मेश मीना | २२ |
| १२ | पदप्रहेलिका - ३ | मधुसूदनशर्मा | २४ |
| १३ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २५ |
| १४ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| १५ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |
| १६ | संस्कृतसमाचाराः | सुदामा शर्मा | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाष: 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
महन्तः प्रतापपुरी
( तारातरामठं, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णाकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाइट : www.bhartipatrika.org

वर्षम् 72 अङ्कः -11
भाद्रपदमासः
विक्रमाब्दः 2079
युगाब्दः 5124
सितम्बर, 2022

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# शिक्षकदिवसः

...✍ प्रोफेसर श्रीकृष्णशर्मा

राष्ट्रनिर्माणे शिक्षकस्य महती भूमिका भवति। छात्रावस्थायां यूनां भविष्य-प्रोन्नयने शिक्षक एव समर्थो भवति। शिक्षकश्छात्रेषु पुत्रवत् स्निह्यति। अतश्चोक्तम्- **'सर्वत्र जयमन्विच्छेत् पुत्राच्छिष्यात् पराजयम्'** इति। देशस्य राजनेतारः, वैज्ञानिकाः, चिकित्सकाः, सैनिकाः, अभियन्तृप्रभृतयोऽध्यापकेभ्य एव गुणवत्तामादधति।

भारतवर्षे समृद्ध-गुरुशिष्यपरम्परा भारतीय-संस्कृतेर्वैशिष्ट्यम्। जायमानस्य शिशोः प्रथमः शिक्षकः मातापितरौ मन्येते। तदनन्तरं गुरुरेव संसारार्णवतारकः शिक्षाप्रदः शिक्षकः। मार्गदर्शकः शिक्षको ज्ञान-विज्ञानयोः स्रोतो भवति। स एव शिक्षयति- **'यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणि'** इति।

जीवनस्यारम्भदशायां शिक्षकेण प्रदत्ताः संस्कारा एव यावज्जीवनं स्थायिनो भवन्ति, यथा नवीनघटनिर्माणे प्रदत्ताः संस्काराः अग्निपाकानन्तरं घटनाशं यावत् सुस्थिराः भवन्ति। अतः शिक्षकोऽपि एतादृश एव भवेद्, यः शिष्येषु किं वा बालकेषु प्रथमे वयसि एव स्वोपदेशैरथ च स्वीय-सदाचरणैः सुसंस्कारान् सङ्क्रामयेत्। शिक्षामधीते वेद वा इति विग्रहे सम्पन्नः 'शिक्षक' शब्दः सङ्केतयति यत् अध्यापयिताऽध्ययनशीलस्तु भवेदेव, अधीतविद्यायाः सम्यग् रूपेण शिष्येषु सम्प्रेषणकुशलोऽपि भवेदित्यावश्यकम्। उक्तञ्च कविशिरोमणिना महाकविकालिदासेन मालविकाग्निमित्रे (1.16) -

**'श्लिष्टा क्रिया कस्यचिदात्मसंस्था,**
**संक्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां,**
**धुरि प्रतिष्ठापयितव्य एव।।**

एतादृशः शिक्षकोऽभूत् **डॉ. सर्वपल्ली राधाकृष्णन्** महोदयः। 05.09.1888 दिनाङ्केऽस्य 'तमिलनाडु' राज्यस्य 'तिरुमनी' ग्रामे ब्राह्मणपरिवारे जनिरभूत्। स एव आदर्श-शिक्षको भूत्वा आन्ध्र-विश्वविद्यालयस्य कुलपतिपदमलञ्चकार। 13.05.1952 तः 12.05.1962 पर्यन्तम् भारतवर्षस्य प्रथमम् उपराष्ट्रपतिपद-मलङ्कृत्य 13.05.1962 तः 13.05.1967 पर्यन्तं द्वितीयं राष्ट्रपतिपदं सुशोभितवान्।

राष्ट्रपतिपदे समारूढे सति स्वजन्मदिवस-समारोहापेक्षया **'शिक्षक-दिवसः'** समायोज्येत इति सर्वपल्ली-महोदयेन अभिलाषः प्रकटितः। तदारभ्य **05.09.1962 तः** 'प्रतिवर्षं' 'शिक्षकदिवसः' समायोज्यते। तेषां मन्तव्यमासीद् यद् शिक्षकाणां कृते समुचितं सम्मानं स्यात्। डॉ. सर्वपल्लीमहोदयः कदाचित् कथितवान् यत् स एव योग्यः शिक्षको

यस्मिन् विद्यार्थि-भावना जागरिता भवति। अध्यापकाद् इदमेवापेक्ष्यते यत् स परिनिष्ठितं, शुद्धं सत्यञ्च वदेत् इति।

तेषां सुदृढा मान्यतासीद् यद् भारतीयं अध्यात्मं समृद्धं वर्तते। भारतीया संस्कृतिः धर्म-ज्ञान-सत्य-केन्द्रिताऽस्ति या प्राणिमात्राय जीवनस्य सत्सन्देशं प्रददाति। तदेव सज्ज्ञानम् यदन्तःस्थितं अज्ञानं निवारयति। भारतीयसंस्कृतौ सर्वधर्माणाम् आदरः शिक्ष्यते। सर्वधर्मसमभावो हिन्दूसंस्कृतेः वैशिष्ट्यम्।

डॉ. सर्वपल्लीमहोदयो भारतीयसंस्कृतेः संवाहको महान् दार्शनिकश्चासीत्। अतः सः 1954 तमे खीष्टाब्दे भारतवर्षस्य सर्वोच्चालङ्कारेण **'भारत-रत्न'** इत्यनेनाऽलङ्कृतः। एतादृशं महानुभावं डॉ. सर्वपल्लीराधाकृष्णन् - महोदयं शिक्षकदिवसावसरे सश्रद्धं संस्मरामः।

**- सम्पादकः**

**आचार्योऽध्यक्षचरश्च, संस्कृतविभागः,**

**जयनारायणव्यासविश्वविद्यालयः,**

**जोधपुरम् (राजस्थानम्)**

**दूरभाषाङ्कः: 8386943655**

## पाठकप्रतिक्रिया

## महामहिमशालिषु सारस्वतमूर्धन्येषु श्रीकृष्णशर्ममहोदयेषु अर्घः

❑ प्रोफेसर डॉ. योगिनी व्यासः

शास्त्रोपासनसंततिस्फुटगुणः सत्कर्मचुञ्चुश्रुतः
संस्काराञ्चितचारुचञ्चितयशाः प्रज्ञाप्रभावोर्जितः।
ओङ्कारार्चनशंयुरात्तमहिमा स्नेहाम्भसां वर्षिता
भूयाद् भारतवर्षगौरवमयः श्रीकृष्णशर्मा सुधीः ॥१॥

ग्रन्थार्थाफलनप्रभाविलसितः संशोधने शेवधिः
श्रद्धाचिन्तनभूतिभाविलसितः विज्ञानसेवारतः।
हर्षोत्कर्षविवर्धनो गुणचणः मेधावितालङ्कृतः
रोचिष्णूत्तमकृष्णशर्मविबुधः प्रेम्णात्र वावन्द्यते ॥२॥

(केन्द्रीय संस्कृतविश्वविद्यालय, दिल्ली के आदरणीय कुलपति आचार्य श्रीनिवास बरखेडीजी द्वारा **'भारती'** पत्रिका के सम्पादक प्रोफेसर (डॉ.) श्रीकृष्ण शर्मा जी के सम्मान के शुभ अवसर पर)

- गांधीनगरम्, गुजरातराज्यम्

# तव कथामृतम्

## ( सप्तद्वीपवती पृथ्वी कदा केन कथं कृता ? )

❑ आचार्यः पं.नथमलशास्त्री दाधीचः

श्रीमद्भागवते प्रोक्तं पुराणं दशलक्षणम् -

**अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।**
**मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः।।**
**दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्।**
**वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा।।**

(भा. २/१०/१-२)

विशेषतश्च ब्रह्मकृतदशविधसृष्टेर्मन्वन्तराणाञ्च कालविभागादिज्ञानाय तृतीयस्कन्धस्य त्रयोऽध्यायाः (10-12) द्रष्टव्याः। अत्रैव विविधसृष्टिज्ञानाय च विंशो(२०)ऽध्यायः प्रोक्तः। तत्रादौ पञ्चमहाभूतेन्द्रियतन्मात्राधियां चराचराणां द्विपदचतुष्पदानां जलस्थलगगनगतीनां प्राणिनां सृष्टिर्ब्रह्मणः प्रकृतिसम्भवानां सत्त्वादिगुणानां वैषम्याद् देवासुरमानवादीनाञ्चोत्पत्तिः स्थितिर्वैकुण्ठविजयस्तदनुग्रहेण भक्तानां भक्तिविपोषणं मन्वन्तराणि सद्धर्मः पुनर्जन्महेतुभूताः कर्मवासनाः, कर्मविपाको भूर्भुवः - स्वरादिलोकानां चतुर्दशभुवनानाञ्चावस्थितिर्हरेरवतारानुचरितमनुसृत्य तत्कथाख्यानोपबृंहिताः पुण्या-स्तद्भक्तानां सतामीशकथाः, आत्मनः शक्तिभिः सहास्यानुशयनं निरोधो मायाधीनत्वमन्यथा रूपं हित्वा जीवस्यात्मस्वरूपेण ज्ञानकर्मभक्तियोगैरात्मयोगस्थितिर्मुक्तिः, सर्वभूतात्मभूतात्मा सर्वकारणकारणं ब्रह्म परमात्मा भगवान् वासुदेव एव जगतामाश्रयोऽत्र प्रोक्तो भागवतस्य मुख्यो विषयः। यथा -

**वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।**
**ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।।**

(भा. १/२/११)

अद्वैतवेदान्ततत्त्वे श्रद्दधानास्तत्त्वविदो ब्रह्मवादिनो मुनयः श्रुतिगृहीतया ज्ञानवैराग्ययुक्तया भक्त्या, सूक्ष्मया बुद्ध्या चात्मानमात्मन्येव ब्रह्म परमात्मानं भगवन्तं वा ध्यानेन स्वहृदि पश्यन्तीति भागवतधर्मदर्शनम्।

अत एव सुसावधानो मनस्वी पुरुषः स्वदेहात्मजाप्तगृहवित्तजनेषु विरूढां ममतां विहाय मनसा मुक्तसङ्गो भूत्वाऽनन्यभक्त्या भवाब्धिं सन्तर्तुं भगवन्तमाश्रयेतायमेव नृदेहस्यात्यन्तिकः परमपुरुषार्थो ब्रह्मसौख्यस्यानन्तलाभो विज्ञेयः। प्रोक्तस्यैतद् दशमलक्षणस्य विशुद्धिरनन्याश्रयासिद्धिरेव श्रीवैष्णवानां प्रपत्तिरात्मनिवेदनस्वरूपा शरणागतिः प्रेमाभक्तिप्राप्तिर्भागवते भगवल्लीलाभूमौ भारते जन्म पुण्यफलत्वेनोद्गीयते।

यथा -

**अहो! भुवः सप्तसमुद्रवत्या**
**द्वीपेषु वर्षेस्वधिपुण्यमेतत्।**
**गायन्ति यत्रत्यजनो मुरारेः**
**कर्माणि भद्राण्यवतारवन्ति।।** (भा. ५/९/१३)

अहो! सप्तद्वीपवत्याः पृथिव्याः सर्वेष्वेव द्वीपेषु वर्षेषु चैतत्परमपावनं पुण्यतमं भारतं भुवि विभाति। यतोहि-पुण्यात्मानोऽत्रत्यजना भगवतः श्रीहरेर्मत्स्या-श्वकच्छपनृसिंहवराहऋषभरामकृष्णाद्यवताराणां मङ्गलमयानि दिव्याद्भुतलीलाचरितानि प्रेम्णा गायन्ति शृण्वन्ति च। अत्र जन्म सुदुर्लभमस्ति। सृष्ट्यादौ रसातलगतां जगतामाधारभूतां धरित्रीं समुद्धर्तुं भगवतो नारायणस्यादिवराहावतारो बभूव। स च यशोमूर्तिर्भगवान् वराहस्तत्र मृधे हिरण्याक्षमादिदैत्यं निहत्य स्वदंष्ट्राग्रेण धरां समुद्धार। स्वयोगमाययाऽऽधारशक्त्यैवाप्सु 'महीं संस्थाप्य ब्रह्मादिदेवैः संस्तुतः स्वलोकं प्रतस्थे। ततश्चैव पृथ्वी सप्तद्वीपवती सप्तसमुद्रवतीति विशेषणविशिष्टा कदा कथं वा सञ्जातेति स्वाभाविको जिज्ञासात्मकः प्रश्नोऽत्र भागवतेन सप्रमाणं समाधीयते –

**यद्यद्विभूतिमत्सत्त्वंश्रीमदूर्जितमेव वा।**
**तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्**

(श्रीमद्भगवद्गीता)

सृष्ट्यादौ स्वायम्भुवमन्वन्तरे हरेरंशांशजन्मनः शतरूपापतेः स्वायम्भुवमनोः प्रियव्रतोत्तानपादौ सुतौ पित्रादिष्टौ भगवतो वासुदेवस्य कलया जगद्रक्षायां स्थितावास्ताम्। अत्रानन्तैश्वर्यशौर्यवीर्यसम्पन्नस्या-तितेजस्विनो राजर्षेः प्रियव्रतस्यात्यद्भुतचरित्रवर्णन-मभीप्सितम्। इतः पूर्वं पृथ्वी सप्तद्वीपवती समुद्रपरिखा च नैवासीदिति सिद्ध्यते। प्रमाणम् –

**प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम्।**
**यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्तवारिधीन्।।**
**भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः।**
**सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः।।**

(भा. ५/१/३९-४०)

आत्मारामः परमभागवतो विभूतिमान् राजर्षिः प्रजावत्सलः प्रियव्रतो भगवतो देवर्षेर्नारदस्य चरणानुकम्पयावगतपरमार्थसतत्त्वोऽपि महतां मानवर्धनस्त्रिभुवनगुरोर्भगवत आदिपुरुषस्यानुशासन-मनुमन्यमानो भगवच्चरणारविन्दयुगलानवरतध्यानेन विधूतकषायाशयो महीतलमनुशशास। स च प्रजापते-र्विश्वकर्मणो दुहितरं बर्हिष्मतीमुपयेमे। गृहस्थाश्रमे वर्तमानस्य तस्यात्मसमानशीलगुणकर्मरूपशौर्यवीर्यो-दाराश्च दशपुत्रा एका चोर्जस्वती नाम्नी कन्या जनिं लेभिरे। **ते पुत्राः सर्व एवाग्निनामानः। आग्नीध्रेध्मजिह्व-यज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथि-वीतिहोत्र कवय इति।** तेषाञ्च कविर्महावीरः सवन इति त्रयस्तूर्ध्वरेतसः पारमहंस्यधर्ममेवाभजन्।

राजर्षिः प्रियव्रतोऽनवरतभगवद्ध्यानोपासनया-लौकिकपौरुषप्रभावमधिगम्यादित्यसमजवेन स्वज्योतिर्मयेन रथेन रजनीमपि दिनं करिष्यामीति विनिश्चित्य द्वितीय इवादित्यः सप्तकृत्वस्तरणिमनु-पर्यक्रामत्। **ये वा उ ह तद्रथचरणनेमिकृत-परिखातास्ते सप्त सिन्धव आसन् यत एव कृताः सप्तभुवो द्वीपाः** (भा. ५१५/३१)

**क्षारोदेक्षुरसोदघृतोदक्षीरोद – दधिमण्डोद-शुद्धोदाः सप्तद्वीपपरिखा इवोपकल्पिताः** सन्ति।

एवमेव **सकलभूमण्डलस्य सरिद्गिरिवनादिप्राकृत-सम्पत्समृद्धाः सप्तमहाद्वीपाः समुद्रसीमासहिताश्चापि जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञाः प्रियव्रतविहिताः सन्ति। इत्थं - समुद्रपरिखा जाता सप्तद्वीपवती मही।** एतेषां सप्तमहाद्वीपा-नामर्वाचीननामा-न्यपि ज्ञेयानि।

बर्हिष्मतीपतिः प्रियव्रतो भूपतिर्यथानुपूर्वमभि-षिच्याग्नीध्रादिसप्तसुतेभ्यः सप्तद्वीपानामाधिपत्यं प्रददौ। **तत्राग्नीध्रशासितो जम्बूद्वीप एव सम्प्रति-सोऽयमस्मदेशिया महाद्वीपोऽभिधीयते।** ईश्वर इव कर्तुमकर्तुमन्यथाकर्तुं समर्थोऽमितपराक्रमो भूपतिः प्रियव्रतो जितषड्सपत्नो देवर्षिनारदोपदिष्टाध्यात्मज्ञानं संस्मृत्यात्मानमनिर्वृतमिव मन्यमानः स्वयं धिग्धिगिति गर्हयामास। राजवंशानुगतां राजलक्ष्मीं महाविभूतिं भुक्तभोगां राजमहिषीञ्चापहाय प्राप्तात्मनिर्वेदो राजगृहान्निरगान्मुक्तसङ्गो नृपः।

जम्बूद्वीपाधिपतिराग्नीध्रोऽपरिमितबलपराक्रमो धर्मतत्त्वज्ञः प्रजाप्रियो बहुकालपर्यन्तं प्रजाः पर्यपालयत्। अथ कदाचिद् राजा पितृलोककामो वनं गत्वा विश्वसृजां पतिं ब्रह्माणं तपसाऽऽराधयामास। ततश्चाप्तकामो राजा दिव्यसौन्दर्यनिधिं गायन्तीं पूर्वचित्तिमप्सरसं विलोक्य कामवशं गतो जडवत्तया सह परिणयप्रसङ्गवार्त्तां व्यदधात्। साऽपि राज्ञो रूपलावण्यसुमधुरालाप-शीलवयोबुद्धिरौदार्यश्रीभिर्मुग्धा राजानं पतिं वव्रे। तदनन्तरं सा राजमहिषी जम्बूद्वीपाधिपतिना सहायुतायुतवर्षोपलक्षणकालं सुभगसुललित-राजसविषयाभिमुखान् भौमस्वर्गभोगानबूभुजत्।

तदन्तराले **राजर्षिराग्नीध्रस्तस्यां भार्यायां नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरणमयकुरु-भद्राश्वकेतुमालसंज्ञान्नवपुत्रानजनयत्।** ततश्चैकदा सा पूर्वचित्तिरप्सरास्तु राजानं राजकुलं राजगृहं राजपुत्रांश्च विहाय भूय एव ब्रह्मलोकं प्रययौ। ततश्च राजाऽपि कामानामतृप्तोऽनुदिनं तामप्सरसमेवाधिमन्यमानस्तस्याः सलोकतामवाप। तदुत्तराधिकारिणो नवराजपुत्राश्च यथाभागं पित्रा विभक्तानि जम्बूद्वीपादि वर्षाणि बहुकालं बुभुजुरितीतिहासः। (भाग. स्क. ५ अध्याय १-२)

**धन्यः प्रैयव्रतो वंशो भक्तिशक्तिविभूषितः।**
**विभूतिभूतिरैश्वर्यशौर्यवीर्यसमन्वितः।।**
**सुप्रीतस्तपसा नाभेर्मेरुदेव्याः स्वयं हरिः।**
**पुत्रतामगमद् यत्र ऋषभः पुरुषर्षभः।।**

।। शुभमस्तु नित्यम्।।

- **संस्थापकः**, पं. मालीरामदाधीचस्मृति-
संस्कृतसेवाशोधसंस्थानम्, छापर (चूरू)

क्रमशः

# गोपाङ्गनावैभवमहाकाव्यम्

## ( अथ षष्ठः सर्गः )

❑ डॉ. प्रमोदकुमारशर्मा

व्यूढोरस्को वृषस्कन्धो गोपिकानन्दवर्धनः।
गोवर्धनसमुद्धर्ता श्रीकृष्णो राधिकाप्रियः।।१।।
भक्तानामभयंकर्ता भक्तानन्दकरो महान्।।
अन्तर्यामी महायोगी योगविद्यासमाश्रितः।।२।।
जन्मभूमौ स्थिते हर्म्ये सुन्दरे श्यामसुन्दरः।
व्रजं सर्वं स्मरन्नन्दं यशोदामातरं तथा।।३।।
सखीभिस्सेवितां राधां स्मृत्वा च मित्रमुद्धवम्।
दिव्यं वृन्दावनं धाम निदध्यौ गोकुलेश्वरः।।४।।
सम्प्रीत्या श्रद्धया भक्त्या स्मारं स्मारं व्रजाङ्गनाः।
मदीयं वेणुनादं तं परमाह्लादकारिणम्।।५।।
वदन्त्यस्संलपन्त्यश्च स्वरूपम्मे हि केवलम्।
राधया सह ताः सख्यस्सखायमुद्धवं हि मे।।६।।
इत्येवं दत्तचित्तोऽसौ सखीनामात्मनश्च ताम्।
अवस्थां हृदये कुञ्जे लुलोके यदुनन्दनः।।७।।
उद्धवज्ञानसंज्ञातामुत्तमां शाश्वतीमहो।
गोपीनामद्भुताम्भक्तिम्प्रगाढस्नेहपूरिताम्।।८।।
वृषभानुसुतां राधां हृद्यां वृन्दावनेश्वरीम्।
दर्शं दर्शं हृदि श्यामो मुमुदे देवकीसुतः।।९।।
वार्तालापक्रमे तस्मिन्नुद्धवः पद्मकोमलाम्।
राधां कृष्णमयीमाह श्वेतां कृष्णमनोहराम्।।१०।।
हे राधे! प्रभुसायुज्यं भक्तौ भवति सर्वदा।
प्रेमिणं कृष्णचन्द्रं तं प्रभुं दर्शय साम्प्रतम्।।११।।
तदा योगेश्वरःकृष्णस्समाहूतो हि राधया।
राधेच्छया प्रभुःकृष्णश्श्रीराधावल्लभस्स्वयम्।।१२।।
श्रीराधान्तःस्थितश्श्यामो वंशीमुकुटभूषितः।
आविर्भूतश्शरीरेण राधिकानन्दवर्धनः।।१३।।
नीलाम्बुजदलश्यामं किशोरं करुणालयम्।
राधया सह संश्लिष्टं वेणुनादनतत्परम्।।१४।।
गोपीनाम्परमात्मानं सर्वभक्तमनोहरम्।
दर्शं दर्शम्प्रभुं कृष्णं ननाम परमेश्वरम्।।१५।।
श्रीराधाकृष्णयोर्युग्मां छविं दृष्ट्वा मनोरमाम्।
उद्धवो मुमुदेऽत्यन्तं सर्वसन्देहहारिणीम्।।१६।।
व्रजभूमिरियं धन्या यत्र वृन्दावने स्वयम्।
राधाप्रेमवशीभूतश्श्रीकृष्णस्सुविराजते।।१७।।
अहोरात्रमहो सर्वाःनिमग्ना यत्र सर्वदा।
श्रीराधाकृष्णयोर्भक्तौ सर्वतश्चैतयोरिमाः।।१८।।
गोपिकाःनित्यसायुज्यमाप्नुवन्ति हरेरहो।
भक्त्या ह्यनन्यया चासां हृदयस्थो जनार्दनः।।१९।।
अखिलागमसंचारि ब्रह्म परं सनातनम्।
दृश्यते तन्निराकारस्साकारो मोहयन्मनः।।२०।।
भक्तचित्तहरस्याहो राधया सह लाकृतेः।
स्वर्णोज्वलविचित्राभाःविविधाःरूपरश्मयः।।२१।।
बिभिदुर्ग्रन्थिकास्सर्वाश्चिच्छिदुस्सर्वसंशयान्।
उद्धवस्य स्वमित्रस्य हृदयस्य महामतेः।।२२।।
वेदान्तज्ञानजन्यं ते त्वहंकारं दुरासदम्।
विनेशुस्सर्वतस्तस्य ज्ञानिनोऽज्ञानवर्धकम्।।२३।।
उद्धवस्य तदा जज्ञे यथार्थज्ञानमुत्तमम्।
अहंकारविनाशात् सः जज्ञौ ब्रह्म सनातनम्।।२४।।
अहं दास्यस्य कृष्णस्य कृष्णोऽस्माकं महाप्रभुः।
गोपिकानामिदं ज्ञानञ्जज्ञे ह्युद्धवस्य मे।।२५।।
नाहं ब्रह्मास्मि जीवोऽहं कृष्णो ब्रह्म सनातनम्।
सर्वैश्वर्यमयी राधा शक्तिराह्लादिनी प्रभोः।।२६।।
इत्येवं चिन्तयन् बुद्धावुद्धवो भक्तिमानभूत्।
जज्ञे भक्तिर्हरेस्तस्य हृदये सुखदायिनी।।२७।।

हरेर्भक्तेस्समावेशाद् हृदये सात्त्विकीं स्वतः।
आचकार स्तुतिं शुद्धां कृष्णभक्तोद्धवःप्रभोः।।२८।।
त्वमेव परमं वेद्यं निधानं परमव्ययम्।
आदिदेवोऽस्य विश्वस्य पुराणःपुरुषस्स्मृतः।।२९।।
यमोऽग्निर्वरुणो वायुश्शशांकस्सूर्यदेवता।
सर्ववेत्ता त्वमेवासि प्रभो!तुभ्यन्नमोऽस्तु मे।।३०।।
मत्वा सखेति हे कृष्ण! यदुक्तं त्वां जगत्पते!।
प्रमादात्प्रणयाद्वापि क्षमस्व परमेश्वर!।।३१।।
पूज्यो गुरुर्गरीयांस्त्वं को ह्यन्यस्त्वत्समःप्रभो!
चराचरस्य लोकस्य त्वमेव जनकःप्रभुः।।३२।।
प्रणम्य शिरसा दिव्यमनादिं त्वाम्प्रजापतिम्।
ईशमीड्यमहं कायम्प्रणिधाय प्रसादये।।३३।।
अद्भुतम्महिमानं ते स्नेहस्याजानता मया।
शय्यासनविहारेषूपहासार्थमसत्कृतः।।३४।।
जगन्निवास देवेश नारायण कृताञ्जलिः।
अमेयमसमाख्येयं क्षामये त्वामहं प्रभो!।।३५।।
यथा पुत्रकृतम्माता पिता वा सहते सुधीः।
अपमानन्तथा विष्णो मत्कृतं सहतां हरे!।।३६।।
सख्युर्यथा सखा नूनं प्रियायाश्च प्रियो महत्।
हरत्येव तथा कष्टं हर त्वं मे दयानिधे!।।३७।।
नमस्सहस्रकृत्वस्ते भूयोभूयःपुनःपुनः।
पुरस्तादथ पृष्ठाच्च सर्वतोऽस्तु नमो नमः।।३८।।
नमन्ति सिद्धसंघास्त्वां पश्यन्ति सर्वदेवताः।
ऋषयस्सर्वभावेन चागत्य कीर्तयन्त्यहो।।३९।।
अन्तर्यामिन्!प्रकीर्त्या ते जगदेतत् प्रहृष्यति।
सर्वतो गोपिका व्यूहस्सततञ्चानुरज्यते।।४०।।
हृषितोऽस्मि निकुञ्जेऽस्मिञ्जगदीश!जगत्पते!।
दृष्ट्वा ह्यदृष्टपूर्वं त्वां राधया सह गोकुले।।४१।।
ग्लानिं मा वह हे विद्वन्!वेदान्तज्ञ!परन्तप!
सर्वदा राधया साकं भवाम्यत्र वने त्वहम्।।४२।।

प्रसन्नेन मयैवैतद्युगलं रूपमुत्तमम्
त्वदीयमोहनाशाय प्रदर्शितम्ममेच्छया।।४३।।
इदं सुदुर्लभं रूपं दृष्टवानसि मेऽद्य यत्।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः।।४४।।
वेदाङ्गज्ञानदानैर्वा सुतपोभिरिदम्परम्।
रूपं द्रष्टुं न शक्यं मे प्रियमित्रोद्धव!शृणु।।४५।।
प्राप्तुं ज्ञातुं च तत्त्वेन द्रष्टुं वृन्दावने प्रिये।
भक्त्या ह्यनन्यया शक्यस्त्वहमेवंविधोद्धव!।।४६।।
मद्भक्ता यत्र गायन्ति स्मारं स्मारम्पुनःपुनः।
मामेव सर्वदा भक्त्या तत्र तिष्ठाम्यहं सदा।।४७।।
ममान्तःस्थानि भूतानि मया सर्वमिदं ततम्।
भगवांस्तादृशोऽहं हि भक्त्या लभ्यस्त्वनन्यया।।४८।।
मनो मयि समावेश्य त्यक्त्वा च सर्वसंशयान्।
उपास्तां श्रद्धया भक्त्या नियतं सर्वदा हि माम्।।४९।।
कामान्विहाय सर्वान् यो भक्त्या स्मरत्यनन्यया।
निर्ममो निरहंकारस्स मामेवाधिगच्छति।।५०।।
श्रुत्वा भगवतस्साक्षान्मुखाद्वाचमुदीरिताम्।
भगवन्तम्पुनःप्राह ह्युद्धवो वेदवित्तमः।।५१।।
अहो त्वदीयं युगलं मनोहरं
परं हि रम्यं शुभदर्शनं कृतम्।
प्रभो!त्वदीया महती कृपाभवन्
मनोभवं कल्मषमेव निर्गतम्।।५२।।

**********

इति गोपाङ्गनावैभवमहाकाव्यस्य
षष्ठस्सर्गःपूर्णतां याति।

**सह-आचार्यः**
संस्कृतमेवं प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-67

# सन्तोष एव पुरुषस्य परं निधानम्

❑ डॉ. योगिनी हिमांशु व्यासः

भारतदेशस्य उत्तरप्रदेशनगरे एकः नृपः आसीत्। सः अतीव महिमशाली, उदारचेताः, पूतात्मा, धार्मिकः, दानवीरः, उत्साही, प्रजानुरञ्जकः नृपतिः आसीत्। दिव्यप्रभाया 'सुनीति' नाम्ना भार्यया सार्धमसौ बहूनि पुण्यकर्माणि चकार। उभौ तौ महाभागौ भुवःआभरणरूपाणि मन्दिराणि चैत्यगृहाणि, भूमिगृहाणि, पुष्पगृहाणि, विमानानि, चित्रशालाः च चक्रतुः। दुर्दैवात् तयोः राज्यकाले अकस्मादेव तुहिनमपतत्, परिणामे च भयंकरो दुर्भिक्षविप्लवः जातः। राजा तु सपत्नीकः निजैः कोशैः अन्नं क्रीत्वा प्राणिनः समजीवयत्। अन्ततश्च प्रजापुण्यात् नृपस्य देव्याश्च प्रभावात् दुर्भिक्षः शशाम। निष्कल्मषया देव्या द्विजेभ्यः अन्येभ्यः याचकेभ्यः च विपुलं दानं दत्तम्। एवं दम्पती सुखपूर्वकं निवसतः स्म।

संस्कृतवाङ्मये भाग्यविषये उत्तमं चिन्तनं प्रस्तुतमस्ति। महाकविना कालिदासेन 'मेघदूतम्' इति काव्ये मनुष्याणां जीवनदशाविषये कथितं यत् –

**कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा।**
**नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।।**

दैवात् सः आत्मानम् अस्वस्थं मन्यते स्म। अस्याः समस्यायाः निराकरणाय विविधाः भिषजाः वैद्याः तत्र आगताः। तैः नृपस्य व्याधिसम्बन्धि परीक्षणमपि कृतम्। सर्वे वैद्याः ऐकमत्येन नृपं कथितवन्तः – 'भो राजन्! भवान् स्वस्थः अस्ति। भवतः शरीरे न काऽपि रुग्णता वर्तते'। नृपः अकथयत्–एतान् सर्वान् अपसारयन्तु। नृपस्य आत्मीयैः जनैः तस्य रोगप्रज्ञानाय बहुप्रयत्नाः कृताः।

एकदा राजसभायां एकस्य अपरिचितस्य चिकित्सकस्य आगमनं जातम्। सः आरोग्यविषये निष्णातः नासीत्, किन्तु दुन्यवी – व्यवहारस्य ज्ञाता आसीत्। नृपसमीपम् आगत्य तस्य नाडीमज्ञातन्तुनेत्र-जिह्वादीनां परीक्षणं कृत्वा नृपम् अकथयत्– 'हे राजन्! भवतः व्याधिः अतीव गम्भीरः अस्ति। समाधानं शीघ्रं करणीयम् नो चेत् भवतः जीवने सङ्कटम् आगमिष्यति'।

तस्य वचनं श्रुत्वैव नृपः अवदत् 'भो चिकित्सक महाशय! रोगेणानेन अहं त्रस्तः अस्मि। यदि भवान् रोगस्यास्य कारणं जानाति, तर्हि अविलम्बेन मार्गं दर्शयतु। किञ्चित् विचार्य चिकित्सकः अकथयत् – 'महाराज! उपायस्तु सरलः अस्ति। यदि भवान् कस्यचित् प्रमुदितजनस्य कञ्चुकम् वस्त्रं वा अवधार्य रात्रिपर्यन्तं शयनं करिष्यति तदा रोगात् मुक्तिः अवश्यं भविष्यति।' नृपः झटिति रक्षापुरुषान् आहूय समग्रराज्ये गमनं कृत्वा भ्रमणं कृत्वा प्रमुदितजनस्य कञ्चुकाहरणाय आदिशत्।

नृपाज्ञां श्रुत्वैव सर्वे रक्षापुरुषाः कञ्चुकान्वेषणाय प्रस्थानं कृतवन्तः। कृते प्रयत्नेऽपि ते प्रमुदितजनं न प्राप्नुवन्तः। केचन जनाः निर्धनाः आसन्। केचन जनाः धनरक्षणार्थं चिन्ताग्रस्ताः आसन्। केचन जनाः व्याधिग्रस्ताः, केचन शत्रुभिः पीडिताः, केचन बान्धवैः परिक्लिष्टाः आसन्। रक्षाधिकारिणः प्रतिदिनं सुखीमनुष्यस्य शोधनार्थं नगरजनेभ्यः सम्पर्कं कृतवन्तः किन्तु प्रासादम् आगत्य जनानां समस्या–दुःखकष्टादीनां

विषये राजानं निवेदितवन्तः। प्रजाजनानां सङ्कटकथाः श्रुत्वा राजा चिन्तितवान्- 'अहो! मम प्रजानां कष्टानां तुलनायाम् अहं अतीव सुखी अस्मि'। तथापि अन्तिमोपायरूपेण सः रक्षापुरुषान् प्रमुदितजनस्य कञ्चुकान्वेषणाय पुनः आज्ञापयत्। नृपाज्ञा तु अविचारणीया अस्ति।

पुनः ते नगरस्य प्रत्येककोणे गतवन्तः। किन्तु कमपि सुखीजनं ते न दृष्टवन्तः। अन्ततोगत्वा द्वौ दूतौ राजसदनं प्रति पुनरागमनसमये सहसा तृणाच्छादितभूम्याम् उपविष्टम् एकं भिक्षुकं दृष्टवन्तौ। तृणस्योपरि उपविष्टः सः वेणुवादनेन गीतगाने मग्नः आसीत्। सः आनन्दमहोदधौ प्रविष्टः इव प्रतिभासते स्म। राजदूतौ शीघ्रमेव तस्य समीपं गत्वा अवदताम्- 'हे भ्रातः! त्वं तु परमार्थतया प्रमुदितः इव प्रतिभाससे। तच्छ्रुत्वा भिक्षुकः किञ्चिद् विहस्य प्रत्यवदत्-भवन्तौ सत्यं कथयतः। अस्यां पृथिव्यां मदन्यः न कोऽपि सुखी वर्तते। अहं येन केन प्रकारेण परिश्रमं कृत्वा रोटिकां प्राप्नोमि। न मे काऽपि चिन्ता।' इत्युक्त्वा सः पुनः वेणुवादने गीतगाने च मग्नोऽभवत्। अथ राजदूतौ तं कथितवन्तौ- 'एकरात्र्यर्थं तव कञ्चुकं वस्त्रं वा देहि। वस्त्रस्य अधिकस्याधिकं मूल्यं तुभ्यं दास्यावः'। 'एतच्छ्रुत्वा सः भिक्षुकः प्रहस्य अवदत्- 'भो महाशयौ। नृपस्यार्थे मम समीपे तु पृष्ठावेष्टनायापि वस्त्रं नास्ति, कंचुकस्य तु का कथा? यदि भवन्तौ इच्छतः तर्हि ममैतदन्तरीयमस्ति। दूताभ्यां भिक्षुकेण सह राजसदनं गत्वा राजानं सर्वं वृत्तान्तं न्यवेदयताम्। राजा तु प्रासादस्योद्याने तृणस्योपरि स्थितं, वेणुवादनम् गीतगानं च कुर्वन्तं भिक्षुकम् अपश्यत्। उद्यानस्य शीतपवने सः अतीवप्रसन्नः लक्ष्यते स्म।

नृपः अचिन्तयत्-यदि पर्याप्तवस्त्रविहीनः पर्याप्तभोजनविहीनः एषः भिक्षुकः आनन्दितः दृश्यते तर्हि अहं तु एतावतः विपुलस्य समृद्धस्य च नगरस्य राजा अस्मि। पूर्वजानां पुण्यप्रतापेन मम एका तनयाऽपि समीपवर्तिनः राज्यस्य पट्टमहिषी अस्ति। मम अर्धाङ्गिनी अपि सहधर्मचारिणी अस्ति। मम प्रजाजनाः अपि संस्कारयुक्ताः सन्ति। एवं भगवत्कृपया स्वर्गसदृशवैभवः मया प्राप्तः।

**यस्यास्ति सुशीला पत्नी तथा च गुणवान् सुतः।**
**पुनश्च विपुलं वित्तं तस्यैव जन्म सार्थकम्।।**

अपरेद्युः नृपः रुग्णतायाः विचारान् त्यक्त्वा पुनः पूर्ववत् स्वस्थतां प्राप्नोति स्म। एतस्याः कथायाः सुन्दरबोधः वर्तते। आचार्यः भर्तृहरिणा सन्तोषविषये कथितमस्ति यत् –

**वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः**
**सम इह परितोषो निर्विशेषो विशेषः।**
**स हि भवति दरिद्रो यस्य तृष्णा विशाला**
**मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः।।**

अपि च –

**सर्पाः पिबन्ति पवनं न च दुर्बलास्ते**
**शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति।**
**कन्दैः फलैर्मुनिवराः क्षपयन्ति कालं**
**सन्तोष एव पुरुषस्य परं निधानम्।।**

**-'देहिन्', प्लॉट सं. १४३५ - सी/१,**
**स्वामिनारायण मन्दिरस्य समीपं, सेक्टर-२/बी,**
**गांधीनगरम्-३८२००७ गुजरातराज्यम्**

# उत्थिते शार्ङ्गपाणौ

❑ डॉ.हर्षदेवमाधवः

उत्थिते शार्ङ्गपाणौ
परिवर्तितं पार्श्वं शेषनागेन,
मात्स्यिकेन प्राप्ता
रोहितमत्स्योदराद्
दुष्यन्तस्य मुद्रिका,
उन्मत्तेन पुरूरवसा लब्धो
वृक्षकोटरात् सङ्गमनीयो मणिः,
ऋतुपर्णेन सह निर्गतो नलो
दमयन्त्याः द्वितीयस्वयंवरार्थं
कुण्डिनपुरम्,
पुष्पितो जातः
सुवर्णाशोकवृक्षो मालविकाभाग्यपरिवर्तनार्थम्,
हनुमता प्रत्यभिज्ञाता
अशोकवाटिकायां रामस्य चिच्चन्द्रिका,
पुष्पकविमानमवतीर्णं
रामगिरौ
यक्षं पुनर्नेतुमलकाम्,
स्वर्गान् निर्वासितेन पुरन्दरेण
पुनरपि पराजितो
दैत्यसर्पः,
शिवनेत्राग्निदग्धः कामः पुनर्जीवितो जातो
हिमगिरिनन्दिन्याः कृपाकटाक्षेण,
भीमगदया चूर्णीभूतः
कौरवकुलकलङ्कः।
अथ किम्।
अलकनन्दे!
उत्थिते शार्ङ्गपाणौ
पेरिसविपणौ
प्रसृतः पुष्पसौरभराशिः,
'बिनबेन' समयाट्टसमीपे
युवमिथुनैः
पुनरप्यालिङ्गनबद्धैः
प्रारब्धं नववर्षनृत्यम्,
टोक्योनगररथ्यासु
निर्गता धूपशलाकाहस्ता
'गेइशा' अभिसारिकाः
स्वप्रियवसतिम्,
प्रभ्रष्टेन कोलम्बसप्लवेन
स्पृष्टा
नवविश्वभूमिः।
अलकनन्दे!
उत्थिते शार्ङ्गपाणौ
त्वमप्यतीर्णा
सुरेन्द्रलोकान्...
नारदसन्देशेन ...।
अहं स्वाङ्गुलिं दष्ट्वा
मम जीवनस्य
करोमि प्रतीतिम्।।

सङ्केतम्
८, राजतिलकबंगलोज, ममता हॉस्पिटल
के सामने, आबादनगर बस स्टॉप समीप,
बोपल, अहमदाबाद-३८००५८,
मो. ९८२७६ २४५१६, ७८७४५ ३२२२५

# नारदभक्तिसूत्रवर्णनम्

❑ युगलकिशोरभारद्वाजः

लोकेऽस्मिन् देवर्षिनारदकृतभक्तिसूत्रस्य महत्त्वं विद्वद्भिः प्रतिपादितम्। महात्मानो विद्वांसो भक्त्या प्रेमानंदरसानुभूत्यर्थं आत्मप्रसादार्थं सद्यः सन्तरणाय जगज्जलनिधौ निमज्जतां स्वोद्धाराय भक्तिरूपा सुदृढा नौका निरूपिता।

नारदभक्तिसूत्रं परमहंसानां प्रियम्। सच्चिदानन्दोपलक्षितं विश्वात्मा भगवान् हरिः इति, अत्र भगवत्कृपाप्राप्तिर्वाऽनुभूतिः वा प्रयोजनमस्य भक्तिसूत्रस्य स्वीकरणीयम्।

अस्य भक्तिसूत्रस्य श्रवणमननभक्त्या जगतो नश्वरत्वदर्शनद्वारा ततो वैराग्यमुत्पाद्य परमात्मनि रागोद्वर्धनम् इति फलं प्रत्यक्षमात्मनि अनुभूयते।

अस्य नारदभक्तिसूत्रस्य सहज-सरल-हिन्दी भाषायां लयबद्धं मूलसूत्रसहितं पद्यानुवादं विद्वज्जनानां सम्मुखे संप्रस्तौमि -

**अथातो भक्तिं व्याख्यास्यामः ।।1।।**
**सा त्वस्मिन् परमप्रेमरूपा ।।2।।**

श्री नारद जी भक्ति सूत्र में, भक्ति की महिमा गाते हैं।
प्रेम स्वरूपा, भक्ति को ही, नारद जी श्रेष्ठ बताते हैं।।

**अमृतस्वरूपा च ।।3।।**
**यल्लब्ध्वा पुमान् सिद्धो भवति ।।4।।**
**अमृतो भवति, तृप्तो भवति ।।5।।**

अमृततत्त्व भी देती भक्ति, साधक को सिद्ध बनाती है।
सदा तृप्त संतुष्ट भाव दे, प्रेम सुधा सरसाती है।।

**यत्प्राप्य न किञ्चित् वाञ्छति, न शोचति।**
**न द्वेष्टि, न रमते नोत्साही भवति ।।6।।**

प्राप्त हुई जब प्रेमाभक्ति, चाह सभी मिट जाती है।
नहीं शोक और नहीं द्वेष, नहीं आसक्ति रह पाती है।।
भोग प्राप्ति उत्साह भावना, जरा नहीं रह पाती है।।

**यज्ज्ञात्वा मत्तो भवति, स्तब्धो भवति,**
**आत्मारामो भवति ।।7।।**

प्रेमस्वरूपा भक्ति पाकर, प्रेम नशा छा जाता है।
स्तब्ध शान्त सा रहता साधक, आत्माराम बन जाता है।।
अनन्त जीवों की अनन्त आत्म में, रमण सदा वह करता है।
अनन्त जीव में व्याप्त प्रभु की, सेवा कर सुख पाता है।।

**सा न कामयमाना निरोधस्वरूपात्।**
**निरोधस्तु लोकव्यापारन्यासः ।।8।।**
**तस्मिन् अनन्यता तद् विरोधेषु उदासीनता ।।9।।**
**अन्याश्रयाणां त्यागोऽनन्यता ।।10।।**

नहीं कामना रखता साधक, काम्यकर्म तज देता है।
प्रियतम प्रभु में अनन्यता पा, नित उदासीन सा रहता है।।

**लोके वेदेषु तदनुकूलाचरणं**
**तद्विरोधिषु उदासीनता ।।11।।**
**भवतु निश्चयदार्ढ्याद् ऊर्ध्वं शास्त्ररक्षणम् ।।12।।**
**अन्यथा पतत्याशंकया ।।13।।**

दिव्य अलौकिक प्रेम प्राप्त कर, दृढ़निश्चयी हो जाता है।
भगवद् अनुकूल शास्त्रकर्मों को, नित ही करता जाता है।।

**लोकोऽपि तावदेव किन्तु भोजनादिव्यापार-**
**स्त्वाशरीरधारणावधि ।।14।।**
**तल्लक्षणानि वोच्यन्ते नानामतभेदात् ।।15।।**
**पूजादिष्वनुराग इति पाराशर्यः ।।16।।**
**कथास्विति गर्गः ।।17।।**
**आत्माख्यविरोधेनेति शाण्डिल्यः ।।18।।'**

भगवत् पूजा कथानुरागी भी, भक्तराज कहलाता है।
आत्मरतिवर्द्धक अनुराग भी, भक्ति को नित्य बढ़ाता है।।

क्रमानुसार .....

**पूर्व-अतिरिक्तनिदेशकः**
**आयुर्वेदविभागः, राजस्थानम्**
**मोबाईल : 9829410781**

# श्रीगणेशतत्त्वम्

❑ डॉ. कैलाशचन्द्रबुनकरः

**सर्वविघ्नविनाशाय सर्वकल्याणहेतवे।**
**पार्वतीप्रियपुत्राय गणेशाय नमो नमः।।**

संस्कृतसाहित्यं विपुलमस्ति। ऋग्वेदः प्रथमो ग्रन्थः। वेदब्राह्मणारण्यकोपनिषदादिश्रुतिस्मृतिपुराणोक्त साहित्यरामायणमहाभारतादिलौकिकसंस्कृतवाङ्मये मानवजीवनस्य परमं लक्ष्यं मोक्षप्राप्तिरिति कथितम्। अनेकानि विघ्नानि तत्रापतन्ति। भगवान् गणेशो विघ्नेश्वरः। गणेशकृपया विघ्नध्वंसः क्षणमात्रेण भवति। अत एव कस्यापि कार्यस्यारम्भे गणेशस्तवनं विना सिद्धिप्राप्तिरसम्भवास्ति।

'आदौ पूज्यो विनायक' इति सूक्त्यनुसारेण श्रीमतो गणेशस्याग्रपूजा सर्वत्र एव सुप्रसिद्धा प्रचलिता च वर्तते। श्रीगणेशः सर्वस्वरूपः, परात्परः पूर्णब्रह्म साक्षात्परमात्माऽस्ति। गणेशशब्दस्य अर्थोऽस्ति यः समस्तजीव-जातेरीशः स गणेश इति।

गणानां जीवजातानां य ईशः अर्थात् स्वामी स गणेशः। सृष्ट्युत्पत्तिकाले आसुरीशक्त्युपस्थापितबाधा निवारणाय परमात्मा स्वयं गणपतिरूपे प्रकटीभूय ब्रह्मकार्यसिद्धिमकरोत्। ऋग्यजुर्वेदादिषु 'गणानां त्वा गणपतिँ हवामहे ' इत्यादिमन्त्रेषु भगवतो गणपतेः सुस्पष्टम् उल्लेखो मिलति। धर्मप्राणभारतीयजनाः वैदिकैः पौराणिकैश्च मन्त्रैरनादिकालादेव प्रथमपूज्यगणेशं पूजयन्ति। ब्रह्माविष्णुरित्यादिगणानामधिपतेः सच्चिदानंदमयगणेशाज्जगदुत्पत्तिस्थितिक्षयात्तस्य सर्वकार्यारम्भे सम्यक्रूपेण पूजनमुपयुक्तं वर्तते।

साहित्ये गणेशतत्त्व-गणेशस्वरूपचिन्तनगणेश महिमागणेशमीमांसादिसर्वविद्याविवरणम् अस्ति। गणेशस्य पूजार्चनोपासनाविषयेऽपि प्रामाणिकं विवेचनमुपलभ्यते।

गणपतितत्त्वविषयेऽत्र किंचिद् व्याख्यायते। सर्वजगन्नियन्तृपूर्णपरमतत्त्वमेव गणपतितत्त्वमस्ति यतो हि गणानां पतिः गणपतिः। गणशब्दः समूहस्य वाचकः समूहपालको गणपतिरथवा महत्तत्त्वगणानां पतिः गणपतिरथवा निर्गुण-सगुण-ब्राह्मगणानां पतिः गणपतिरथवा सर्वाब्धिगणस्फूर्तिदायकः परमात्मा गणपतिरिति।

गणपत्यथर्वशीर्षेण 'नमस्ते गणपतये त्वमेव केवलं कर्तासि त्वमेव केवलं हर्तासि त्वमेव सर्वं खल्विदं ब्रह्मासील्यादिवचनेन गणपतिशब्दद्वारा ब्रह्मैव निर्दिष्टम्। अतीन्द्रियसूक्ष्मातिसूक्ष्मवस्तु-तत्त्वनिर्णयः केवलं शास्त्रमाधारीकृत्य स्वीकर्तुं शक्यते। ब्रह्मापि शास्त्रैकसमधिगम्यम्। गणपतितत्त्वावगमेऽपि मुख्यतया शास्त्रमेव प्रमाणम्। शास्त्रानुसारमिदमेव ज्ञायते यत्सर्वस्य जगतः पतिरत्र गणपतिर्यतोहि-गण्यन्ते बुद्ध्यन्ते ते गणाः इति व्युत्पत्त्यनुसारं सर्वं दृश्यमात्रमेव गणः तस्याधिष्ठाता गणपतिः।

एकमेव परमतत्त्वं भिन्नभिन्नोपासकैः भिन्नभिन्नकामनासिद्धये स्वकीययाचिन्त्यलीलाशक्त्या भिन्नभिन्नगुणगणसम्पन्नं भूत्वा विभिन्नैः नामभिरभिव्यक्तं भवति। प्राधान्येन विघ्नविनाशकत्वादिगुणवैशिष्ट्येन तदेव परमतत्त्वं गणपतिरूपेण आविर्भवति।

गणपत्यथर्वशीर्षस्थस्य त्वमेव प्रत्यक्षं

तत्त्वमसीत्यस्याभिप्रायोऽयं यद् गणपतिस्वरूपं नरगजयोरुभयोः सामंजस्यं प्राप्नोति। परस्परविकल्प-प्रतीयमानयोः तावपदयोरभेदमिदं वचनं सूचयति यतो हि तत् पदार्थः परमात्मा त्वं पदार्थश्च जीवः तयोरैक्यं यद्यपि आपाततो विरुद्धं तथापि लक्षणया विरुद्धांशद्वय-त्यागादेकता सुसम्पन्ना। एवमेव जगति यद्यपि नरस्य गजस्य चैक्यमसम्भवं तथापि लक्षणया विरुद्धधर्माश्रये भगवति तत्सामंजस्यं यथा तत्पदार्थः ब्रह्म त्वं पदार्थः जगन्मयः सोपाधिकब्रह्म, अनयोरखण्डैकरसोऽसि पदार्थे सामंजस्यं तथैव नरगजस्वरूपस्य गणपतिस्वरूपे सामंजस्यम्। त्वं पदार्थः नरस्वरूपस्तत्पदार्थो गजस्वरूपोऽनयोरखण्डैकरसगणपतिरूपेऽसिपदार्थे सामंजस्यमस्ति। शास्त्रेषु नरपदो न प्रणवात्मकः सोपाधिकगणः कथ्यते–नरा जातानि तत्त्वानि नराणामिति विदुर्बुधाः, गजशब्द व्याख्या शास्त्रेषु–समाधिना योगिनो यत्र गच्छन्ति इति 'ग', यस्माद् बिम्बप्रतिबिम्बतया प्रणवात्मकं जगज्जायते इति 'ज' सोपाधिकस्त्वं पदार्थात्मको नरः गणेशस्य पादादिकण्ठपर्यन्तो देहः सोपाधिकत्वान्निरूपाधिकापेक्षया निकृष्टः। अत एव अधोभूतांगनिरुपाधिः सर्वोत्कृष्टस्तत्पदार्थमयो गणेशस्य कण्ठादिमस्तकपर्यन्तो गजस्वरूपः निरूपाधिकत्वा-त्सर्वोत्कृष्टः समस्तपादादिमस्तकपर्यन्तो गणेशदेहोऽसि पदार्थोऽखण्डैकरसोऽस्ति। गणेशः एकदन्तः। एकशब्दो मायाबोधको दन्तशब्देन मायिको बोध्यते। इति **मुद्गलपुराणे** कथितम्।

**एकशब्दात्मिका माया तस्याः सर्गं समुद्भवम्।**
**दन्तः सत्ताधरस्तत्र माया चात्मकमुच्यते।।**

वक्रम् आत्मरूपं तुण्डं मुखं यस्येति वक्रतुण्डो गणेशः।

कण्ठाद्यो मायया युक्तं मस्तकं तु भवाचकम्।
वक्राख्यं येन विघ्नाशस्तेनायं वक्रतुण्डकः।।

देवतानरासुरनागेति चतुर्णां स्थापकश्चतुर्वेदचतुर्वर्गादि-स्थापको गणेशश्चतुर्भुजः भक्तानुग्रहायाऽसौ चतुर्हस्तेषु पाशांकुशकरमुद्राऽभयमुद्रां दधाति। भक्तमोहरूपं शत्रुमाबद्धं पाशस्तथा सर्वजगन्नियन्तृरूपं ब्रह्म अंकुशः दुष्टनायक ब्रह्मदन्तः सर्वव्यमद ब्रह्मवर इति। अतः सिद्धमिदं यत्पूर्णब्रह्मपरमात्मा एव निर्गुणविघ्नविनाश-कत्वादि–गुणगणविशिष्टगजवदनादि–अवयवमूर्ति-धररूपः श्रीगणेशः। श्रद्धया ज्ञानार्जनं कृत्वा सर्वकार्यारम्भे गणेशमाराधयेत्। यथा –

**गजाननं भूतगणादिसेवितं**
**कपित्थजम्बूफलचारुभक्षणम्।**
**उमासुतं शोकविनाशकारकम्**
**नमामि विघ्नेश्वरपादपंकजम्।।**

**विघ्नेश्वराय वरदाय सुरप्रियाय**
**लम्बोदराय सकलाय जगद्धिताय।**
**नागाननाय श्रुतियज्ञविभूषिताय**
**गौरीसुताय गणनाथ नमो नमस्ते।।**

**- प्राचार्यः, राज. लक्ष्मीनाथशास्त्री संस्कृत-महाविद्यालयः, चीथवाड़ी, ( जयपुरम् )**

# लघुशब्देन्दुशेखरस्य श्री गुरुप्रसादशास्त्रिकृताया 'वरवर्णिनी' टीकाया अनुशीलनम्

❑ श्रीमती उषा शर्मा

**व्याकरणे प्रयोजनम्** -

अथ शब्दानुशासनमिति भाष्यकाररचनानुसारेण शब्दाननुशास्तीदं शास्त्रमिति कारणात् **शब्दानुशासनमेव** व्याकरणस्य प्रधानं प्रयोजनं भवति। प्रकृति-प्रत्ययविभागकल्पनया सामान्यविशेषवता लक्षणेन च शब्दानामनुशासनमित्यर्थः। भगवान्पतञ्जलिः वेदाङ्गत्वेन व्याकरणस्य पञ्च मुख्यप्रयोजनानि त्रयोदश गौणप्रयोज-नानि च प्रत्यपीपदत्। तानि च 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इत्युपक्रम्य वर्णितानि। यथा-

**१. रक्षा** - सतोऽप्यर्थस्यापायराहित्यं रक्षा। लोपागमवर्ण-विकारज्ञो हि सम्यग्वेदान्परिपालयिष्यति। विद्यमानस्य वर्णस्यादर्शनं लोपः। यथा 'अदुह' इत्यत्र दुहेर्लङि झस्, अदादेशे 'लोपस्त आत्मनेपदेषु (७-१-४१) इति तस्य लोपः। आगमश्चाविद्यमानस्य वर्णस्योपस्थितिः। यथा 'सौभाग्यमस्यै दत्वाय' इत्यत्र 'क्त्वो यक्' (७-१-४१) इति यगागमः। वर्णविकारश्च विद्यमानस्य वर्णस्य वर्णान्तरपरिणतिः। यथा - 'उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्' इति मन्त्रे उद्ग्राहनिग्राहशब्दयोः हकारस्य स्थाने भकारः परिलक्ष्यते। नव्यवैयाकरण इमानंशानध्यवस्यति।

**2. ऊहः** - आश्रयलिङ्गवचनभेदेन भवत्यूहः। न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन यथार्थं विपरिणमयितव्याः। यथा - 'अग्नये जुष्टं निर्वपामि' इति प्रकृतियागे। सूर्योद्देश्यके यागे 'सूर्याय जुष्टं निर्वपामि' इति विपरिणामः। न शक्नोत्यवैयाकरणः यथायथं विपरिणमयितुम्। तस्माद् व्याकरणमध्येयम्।

**3. आगमः** - पारम्पर्येणागतः श्रुतिलक्षण-उपदेशः आगमशब्देनोच्यते। यथा - 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'। पदपदार्थावगमस्य व्याकरणनिमित्तत्वाद् वाक्यवाक्यार्थावसायस्य च तन्मूलत्वात् षट्स्वङ्गेषु व्याकरणं प्रधानमित्युच्यते प्रधाने च कृते यत्नः फलवान् भवति। तस्मादध्येयं व्याकरणम्।

**4. लघु** - अचिरकालसम्प्रतिपत्तिः लाघवम्। लघुना उपायेन शब्दा ज्ञेयाः। उपायश्च कार्यनिर्वृत्तिं प्रति कारणानां विन्यासविशेषः। अध्यापनं हि ब्राह्मणस्य वृत्तिः। तेनावश्यं शब्दा ज्ञेयाः। शब्दज्ञानं प्रति व्याकरणमेव लघूपायः। एवञ्च सकलसाधुशब्दज्ञानहेतुभूतप्रक्रिया-रूपलघुभूतोपायज्ञानार्थं व्याकरणमध्येयम्।

**5. असन्देहः** - सन्देहरहितत्वेन स्वरादीनां ज्ञानम्। स्वरभेदादर्थभेदो भवति। याज्ञिकाः पठन्ति 'स्थूलपृषती-माग्नीवारुणीमनड्वाहीमालभेत' इति। यद्यत्र पूर्वपदप्रकृतिस्वरत्वं तर्हि स्थूलानि पृषन्ति यस्याः सा इति बहुव्रीहिः। अथान्तोदात्तत्वं तदा स्थूला चासौ पृषती चेति तत्पुरुषः। न हि वैयाकरणस्य संदेहो भवति। तस्मात्सन्देहप्रागभावपरिपालनायाध्येयं व्याकरणम्।

वेदकालादारभ्य निरवच्छिन्ना व्याकरणग्रन्थ-रचनापरम्परा विलोक्यते, तथापि नासाद्यते साम्प्रतं पाणिनीयाष्टाध्याय्याः प्राक्तनः कश्चिद् व्याकरणग्रन्थः। अष्टस्वध्यायेषु द्वात्रिंशत्पादेषु प्रायेण चतुःसहस्र-

सङ्ख्याकेषु च सूत्रेषु सन्ति निबद्धाः संस्कृतभाषाव्याकरणनियमाः। यद्यपि चान्द्रादिव्याकरणेभ्यः प्राक् शर्ववर्मणा जैनेन सातवाहनस्याशुसंस्कृतभाषाबोधाय प्रक्रियानुसारि कातन्त्रव्याकरणं विरचितमासीत्। तथापि द्वादशख्रीस्तशताब्दीं यावत् तादृश्याः पद्धतेः पूर्णतो लोकप्रतिष्ठाभावात् पाणिनेस्त्रिमध्यायपादसूत्रानुसारिणी सरणिः परवर्तिषु चान्द्र-जैनेन्द्र-शाकटायन-सरस्वती-कण्ठाभरण-हैमादिव्याकरणेषु तत्तद्व्याकरणप्रणेतृभिर्बौद्धजैनादिभिः समाश्रितैव।

'अष्टाध्यायी' ग्रन्थस्य वैयाकरणसिद्धान्तकौमुदी-टीकालिखिता भट्टोजीदीक्षितमहोदयेन। वैयाकरण-सिद्धान्तकौमुदीग्रन्थस्य नागेशभट्टमहोदयेन लघु-शब्देन्दुशेखरनाम्नी टीका लिखिता। तस्यैव ग्रन्थस्य टीका लिखिता वैद्यनाथपायगुण्डेमहोदयेन।

लघुशब्देन्दुशेखरस्य अन्याः टीकाः -

- शिवनारायणशास्त्रीकृता **विजया** टीका।
- उदयशंकरपाठकविरचिता **ज्योत्स्ना** टीका।

**चिदस्थिमाला**

नागेशभट्टस्य प्रधानशिष्येण श्रीवैद्यनाथपाय-गुण्डेमहोदयेन विरचिता चिदस्थिमाला टीका शेखरपङ्क्तिलापने 'कुतः' केन वा का किल शङ्का कौमुदीमधिकृत्य कृता? यामपहस्तयितुममुष्याः शेखरपङ्क्तेरवतारः इत्याद्यवश्यज्ञातव्यविषयप्रकटने च सर्वाष्टीका अप्यतिशेते।

क्वचन प्रतिपङ्क्ति प्रतिपदञ्च क्वचन दुर्विगाह-विषमतमाऽशुद्धि-दुरुक्ति-द्विरुक्ति-पङ्क्ति -विपर्यास-प्रसङ्गभङ्गादिदूषणगणैराकुलीकृताया अस्याः शोधनं नाम नवीनटीकानिर्माणादपि गरिष्ठमतिमात्रं मनोव्यथामापादयदपि श्रीचिन्तामणिगुरुचरणकृपयैव निर्व्यूढमिति वस्तुस्थितिरेवैषा। अस्याः **कणेहत्य** रसमास्वादयन्तो रसिकाः प्रकामं नाम प्रमोदं धास्यन्ति। अस्याश्च काप्यभिनवैव वर्णनशैलीति द्रष्टृणां स्पष्टमेतद्भवे-देवाभिरूपपुङ्गवानाम्।

अस्मदुपलब्धेषु चतुर्ष्वपि पुस्तकेषु प्रत्यक्षरं दुर्विग्राह्या अशुद्धयो ग्रन्थरत्नं दूषयन्त्य इवोपलभ्यन्ते। ता निरस्य प्रकाशनं नामासिधाराऽवलेहनमेव। अथ तत्कियदिव निर्व्यूढमस्माभिरित्यत्र तु विद्वांसः प्रमाणम्। इयं कारकान्तैवोपलभ्यते।

**वरवर्णिनी**

आचार्यश्री**गुरुप्रसादशास्त्रि**महोदयः राजस्थान-प्रदेशे झुञ्झुनूं मण्डलान्तर्गत- **'चिडावा'** ग्रामे संवत् १९५७ वैक्रमाब्दे (सन् १९०० ईशवीये) वर्षे ज्येष्ठशुक्लपञ्चम्यां श्रीमतां **शिवनारायण**शास्त्रिणां पुत्रत्वेन जनिं लेभे। अस्य मातुर्नाम **राजलक्ष्मीदेवी** इत्यासीत्। सः प्रारम्भिकमध्ययनं पूज्यपितामहचरणानां पितृचरणानाञ्च चरणयोः स्थित्वा सम्पादयामास। ततः सः स्वीय-वाराणसीप्रवासकाले वैयाकरणकेसरिणः पण्डितदेव-नारायणत्रिपाठिनः व्याकरणशास्त्रम्, न्यायमार्तण्डात् महामहोपाध्याय-स्वर्गीय-श्रीवामाचरणभट्टाचार्यात् न्यायशास्त्रञ्च गाम्भीर्येणाऽधीतवान्। पितुः संसर्गजेन प्रभावेणाऽयं शीघ्रमेव शास्त्राणां प्रौढो विद्वान् संवृतः। **विंशति**-वर्षदेशीय एव सः काशिकराजकीयसंस्कृत-महाविद्यालयात् व्याकरणाचार्यपरीक्षां प्रथमश्रेण्या-मुत्तीर्य सर्वतोऽधिकानङ्कान-वाप्तवान्। ततः सः न्यायाचार्य-दर्शनाचार्य-

आयुर्वेदाचार्यप्रभृतय: परीक्षा अपि प्रथम-श्रेण्यामुत्तीर्य विशिष्टं कीर्तिमानं स्थापितवान्। सर्वकारीय-सेवाविरुद्धत्वात् तेन कृतश्चिदनुदानस्वी-कारमन्तरेण **'राजस्थानसंस्कृत-कालेज'** इत्याख्या संस्था स्थापिता, यत्र स: प्रधानाचार्य आसीत्। संवत् २०२९ वैक्रमाब्दे (सन् १९७२) ईशवीये वर्षे श्रावणकृष्णचतुर्दश्यां स: दिवङ्गत:। अस्य ग्रन्थेषु प्रामुख्यम्भजमाना: सन्ति –

- ससटीकाविभूषित: लघुशब्देन्दुशेखर:।
- राजलक्ष्मीसंवलितं सम्पूर्णमहाभाष्यम्।
- लघुशब्देन्दुशेखरसहिता सिद्धान्तकौमुदी चेति।

पण्डितगुरुप्रसादशास्त्रिण: पुत्र: पण्डित-**सीतारामशास्त्रीमहोदयोऽपि** व्याकरणे साहित्ये च प्रौढो विद्वानासीत्। तेन काशी-हिन्दूविश्वविद्यालयस्य संस्कृत-महाविद्यालये व्याकरणाविभागाध्यक्षरूपेणाधिकं समयो यापित:। सन् १९८७ ईशवीये स: सेवानिवृत्तो जात:।

पण्डितसीतारामशास्त्रिणां सुपुत्र आचार्य-**बालशास्त्री** तत्रैव व्याकरणविभागाध्यक्ष-संकायप्रमुखादि पदमलङ्कृत्य २०२० ईशवीयेऽब्दे सेवानिवृत्तिमलभत, अधुना च वाराणस्यां चकास्ति।

अत्र **वरवर्णिनीटीकायां** स्वसम्प्रदायमनुरुद्ध्यैव सर्वे परिष्कारा:, न्यासाश्च, विशिष्टा: शङ्का: समाधानाश्च निवेशिता:। यथा – पातञ्जले महाभाष्ये कृतभूरिपरिश्रम:।

'अत्र पातञ्जलं महाभाष्यमिति समुदितमेव नाम, खण्डश: प्रयोगस्तु प्रामाणिकानां 'भीम:, सत्ये'-तिवन्नामैकदेशन्यायादिति पदद्वयोपादानोपपादनाय विलश्यन्तो नागेशोक्तिप्रकाशकृतो दण्डिभट्टादयश्च समाहिता:।' पातञ्जले योगशास्त्रे, महाभाष्ये चे'ति व्याख्यानमपि सहृदयोद्वेजकमेव, समुचितमहाभाष्य-कीर्त्तनमुपेक्ष्यादौ स्वीययोगशास्त्रप्रावीण्यख्यापनस्या-त्यन्तमनुचितत्वात्। तदेवं 'मार्त्तण्ड इत्यादौ शब्दज्ञानानु-पाती' त्यादिना स्वोक्तिं समर्थयमाना मैथिला: पराकृता:। इत्येवं वरवर्णिनीकारो विस्पष्टं व्याख्याति।

**- शोधार्थी, व्याकरण-विभागे,**
**ज. रा.राजस्थानसंस्कृतविश्वविद्यालय:, जयपुरम्**

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 150/–, पंचवर्षीय शुल्क 700/–, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**

खाता संख्या – **2139101912498**

**IFS Code - CNRB0002139**

# वैदिकसाहित्ये राष्ट्रियैकतायाः सन्दर्भाः

❑ डॉ. मनीषकुमारशर्मा

तत्राऽस्माकं भारतीयसंस्कृतेः प्राणभूताः प्रमाणभूताश्च सन्ति वेदाः। अस्माकं भारतीयसंस्कृतेः विचारधारा विश्वस्य संस्कृतेः कृते आदर्शभूता वर्ततेऽनयैव 'वसुधैव कुटुम्बकम्' इति विचारः प्रस्तुतो यया च विश्वस्य मानवेषु परस्परं धर्मजातिदेशादीनां भेदानामस्पृष्टभावेन भ्रातृभावो जागरितो भवति। वयं सर्वे एकस्यैव हि ईश्वरस्य सन्ततय इत्युक्त्या भगवतः कल्पना क्रियते। अधुना विज्ञानगर्वितो मानवः न तस्य ईश्वरस्य सत्तां स्वीकरोति। विभिन्नाविष्काराणां माध्यमेन यैर्मानवैः नूतनतकनीकजनकानि वस्तूनि उत्पाद्यन्ते त एवैतेषां सूक्ष्मवस्तूनामुत्पादनस्य शङ्कया भगवतः सत्तां न स्वीकुर्वन्ति। ते तु वैज्ञानिकप्रयोगाणां माध्यमेन सृष्ट्युत्पत्तिरहस्यं किंचिद् ज्ञात्वा गर्विता भूत्वा ईश्वरं न मन्यन्ते।

अस्माकं भारतीया हि संस्कृतिः वेदज्ञानाधारिता वर्तते। वेदो हि अखिलज्ञानमूलं वर्तते। तत्र वेदेषु सृष्टेः उत्पत्तिविषयेऽपि विस्तृतकथनानि वर्तन्ते। ऋग्वेदे यजुर्वेदे अथर्ववेदे च नैकत्रैतानि वर्णनानि प्राप्यन्ते यत्र हि न केवलं सृष्टिविषयकसिद्धान्ता अपितु सृष्टेः पूर्वावस्थाया अपि प्रतिपादनं क्रियते। तत्रैवाऽस्मिन् प्रसंगे राष्ट्रियैकताया भावनायाश्चापि सद्भावोऽत्र समाहितो वर्तते।तत्र-

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः[1]।।**

इत्यत्र हि हितोपदेशवाक्योपदेशेन राष्ट्रियैकताया विषयकप्रसंगो दृष्टिगोचरीभवति। तत्र ऋग्वेदेऽपि नैकत्र एतादृग्भवनाया विस्तरेण वर्णनं समुपलभ्यते। अस्मिन्नेव सहभावप्रभावेण जीवन्तो मनुष्या निरतं समस्तजगत्स्रष्टुः सहायकत्वेन प्राणधारणं कुर्वन्ति। अर्थाद्धि सकलजडचेतनतत्त्वेषु जगत्स्रष्टा वर्तमानो भवति येन हि सकलानामपि कार्याणामशेषेण निष्पादनं जायते। स एव हि जगत्स्वामी परमपिता परमेश्वरः अस्मानखिलान् प्रकाशयत्विति ऋग्वेदे प्रोच्यते-

**संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ।**
**इळस्पदे समिध्यसे स नो वसून्या भर[2]।।**

भारतीयसंस्कृतेः ज्ञाननिधिरयं ऋग्वेदो सकलचराचरजगत्यस्मिन् प्रतिनिधितया समुपदेशको भवति। तत्र ऋग्वेदस्याऽन्तिमे सूक्ते राष्ट्रियैकताया न केवलं महत्त्वमपितु अस्माकं जीवने तस्या महत्यावश्यकता नितरां प्रस्तूयते। यथा हि-

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते[3]।।**

अत्र हि परस्परं सहभावपूर्णमाश्रित्य सहैव गन्तव्यम्, स्नेहभावपूर्णं च परस्परं प्रवर्तितव्यम्। समविचारसम्पन्नो भूत्वा ज्ञानार्जनं करणीयमिति विचारो वर्तते। एवमेवाऽन्यत्रापि कथ्यते यत् सर्वेषामेव जीवानां समप्रार्थनाभूतत्वात् पारस्परिकाभेदभावनासमवेतत्वेन परस्परमेलनं भवेदिति-

**समानो मन्त्रः समितिः समानी**
**समानं मनः सह चित्तमेषाम्।।**
**समानं मन्त्रमभि मन्त्रये वः**
**समानेन वो हविषा जुहोमि[4]।।**

अत्रापि मनुष्याणां सहृदयभावनायाः संकेतेन

सहभावस्य महत्त्वं प्रस्तूयते। अत्रोच्यते यत् हृदयेषु सहभावमात्रेणैव समविचारा अपि भवितुं प्रभवन्ति। अतस्तत्रैकसंकल्पमात्रेण सुसंघटिता भूत्वैव सर्वाणि कार्याणि सम्पादयितुं शक्यते इति–

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति[५]।।**

एतेनैव समभावेन पूर्णा भवत्यस्माकं भारतीया हि संस्कृतिः। अत्र विश्वबन्धुत्वभावनायाः सन्दर्भाः पदे पदे दरीदृश्यन्ते। समत्वदृष्टिप्रतिपादकं वाक्यं तत्र नैकत्र प्राप्यते। एषा हि भावना स्वाऽपरभेदराहित्येन मानवेषु सार्वलौकिकीमुन्नतिं कथयति–

**मित्रस्याऽहं चक्षुषा सर्वाणि भूतानि समीक्षे।**
**मित्रस्य चक्षुषा समीक्षामहे[६]।।**

उदारचरितानां तु वसुधैव कुटुम्बकमिति भावनापि अस्माकं भारतीयसंस्कृतेः प्रधानमङ्गमस्ति। तत्र हितोपदेशकथनादपि एतदेव प्रस्तूयते–

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्[७]।।**

तत्र यजुर्वेदेऽपि विश्वकल्याणभावनाया निष्पादकवाक्येन विश्वबन्धुत्वमुच्यते–

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विचिकित्सति[८]।।**

तथा च

**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः[९]।।**

पृथिव्या मातृभावेन स्वीकरणात्स्वस्य तत्पुत्रवदाचरणमिति भावोऽपि वेदेषु लब्धख्यातो वर्तते। तत्राथर्ववेदेऽपि विषयेऽस्मिन्नुच्यते यत् –

**माता भूमिः पुत्रोऽहं पृथिव्याः।**
**तथा च वयं तुभ्यं बलिहृतः स्याम[१०]।।**

एवमेव राष्ट्रियैकताया भावनाया विचारा वेदप्रसिद्धा आसन् तत्रैकोद्देश्येन मिलिता भूत्वा समाजस्य राष्ट्रस्य चोन्नतिं सम्पादयितुं शक्यत इत्यथर्ववेदे प्रस्तूयते–

**सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।**
**अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या[११]।।**

उदारताया भावनाया वर्णनं तत्र ऋग्वेदे दृश्यते यत् –

**मोघमन्नं विन्दते अप्रचेताः**
**सत्यं ब्रवीमि वध इत्स तस्य।**
**नार्यमणं पुष्यति नो सखायं**
**केवलाघो भवति केवलादी[१२]।।**

एवं सर्वत्रैवास्माभिः वैदिकसाहित्ये राष्ट्रियैकताया भावना– विषयकविचारा दृश्यन्ते। एतेनैव राष्ट्रियैकतायाः प्रतिपादकत्वेन वेदा न केवलं भारतीयसंस्कृतिमूलमपितु सकलचराचरजगति प्रधानभावेनैव दरीदृश्यन्त इति।

**– ग्राम-सारंगपुरा, बड़ के बालाजी,**
**अजमेर रोड, जयपुर**
**मो. 9694323226**

*सन्दर्भाः–*

१. हितोपदेशः– १/३४ २. ऋग्वेदः– १०/१९१/१
३. ऋग्वेदः– १०/१९१/२ ४. ऋग्वेदः– १०/१९१/३
५. ऋग्वेदः– १०/१९१/४ ६. यजुर्वेदः– ३६/१८
७. हितोपदेशः– १/६९ ८. यजुर्वेदः– ४०/६
९ यजुर्वेदः– ४०/७ १०. अथर्ववेदः– १२/१/१२,६२
११. अथर्ववेदः– ३/३०/१ १२. ऋग्वेदः– १०/११७/६

# व्याकरणाध्ययनस्य महत्त्वम्

❑ जन्मेश मीना

वेदार्थज्ञानाय केषाञ्चित् सहायकग्रन्थानां महती आवश्यकता भवति। यथा – शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषं, कल्पः। स्वरबोधनाय वर्णबोधनाय च व्याकरणस्य परमावश्यकता भवति। उक्तं च –

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु।।**

पाणिनीयशिक्षायामेव वेदार्थज्ञानाय षडङ्गानां महत्त्वं युक्तम्–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राणं तु वेदस्य, मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

(पाणिनीय शिक्षा ४१–४२)

मानवजीवनशुद्ध्यर्थं भावशुद्धिश्च नितरामावश्यकी। भावशुद्धिः विचारशुद्ध्या भवति। विचारश्च शब्दशुद्ध्या भवति। शब्दस्य शुद्धिः व्याकरणज्ञानेन भवति। अत एव व्याकरणस्य ज्ञानं परमावश्यकं वर्तते मानवजीवनाय। सर्वैरपि व्याकरणशास्त्रं परमपावनं स्वीक्रियते। व्याकरणे प्रकृतिप्रत्ययस्य विचारः, उदात्तादिस्वरविचारः, उदात्तादिस्वरसंचारनियमाः, सन्धिनियमाः, शब्दरूप–धातुरूपादिनिर्माणनियमाः, प्रकृतेः प्रत्ययस्य च स्वरूपावधारणं, तदर्थनिर्धारणं चेति, विविधा विषया विविच्यन्ते। वेदार्थबोधनाय प्रकृतिप्रत्ययानां स्वराणां च बोधः परमावश्यकः। अतश्चोक्तं **वाक्यपदीये** स्वोपज्ञटीकायाम् –

**'तेषां हि सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः।** व्याकरणेन न केवलं शब्दशुद्धिः भवति, अपितु ब्रह्मप्राप्तिरपि भवति, एकस्यापि शुद्धस्य शब्दस्य ज्ञानं सुप्रयोगश्च स्वर्गे लोके कामधुक्त्वेन प्रशस्यते। पतञ्जलिना उक्तम् – 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति'।

ऋग्वेदे वर्ण्यते यद्यो वाक्तत्त्वं सर्वथा पश्यति, वाक्तत्त्वमपि तस्मै स्वकीयं रूपं प्रकटयति –

**उत त्वः पश्यन् न ददर्श वाचम्,**
**उत त्वः शृण्वन्न शृणोत्येनाम्।**
**उतो त्वस्मै तन्वं विसस्रे**
**जायेव पत्य उशती सुवासाः।।**

वाक्यपदीयेऽपि शब्दब्रह्म सावयवत्वेन शब्दसंस्कारः निरूप्यते –

**'तस्माद् यः शब्दसंस्कारः,**
**सा सिद्धिः परमात्मनः।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते'**

(वा.प. १.१३२)

व्याकरणेन शब्दसंस्कारः भवति। शुद्धशब्देन परमात्मनः साक्षात्कारः भवति। शब्दस्य ज्ञानाश्रयत्वात् शब्दज्ञानयोः नित्यत्वात् सर्वं शब्देन भासते। उक्तं च –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमाद् ऋते।**
**अनुविद्धमिव ज्ञानं, सर्वं शब्देन भासते।।**

(वा.प. १.१२३)

भगवता भर्तृहरिणा वाक्यपदीयेऽपि उक्तम् –

**शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।**
**यन्नेत्रः प्रतिभात्माऽयं भेदरूपः प्रतीयते।।**

– वा.प. १/११९

स्वर–वर्णोच्चारणज्ञानं विना अर्थबोधो न भवति। वेदेषु स्वरज्ञानस्य शुद्धप्रयोगस्य च महती आवश्यकता भवति। उक्तं महाभाष्ये पाणिनीयशिक्षायामपि –

**मन्त्रो हीनः स्वरतो वर्णतो वा**
**मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति**
**यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**

– पा.शि. ५२

वेदेषु मानवस्याखिलं कृत्यजातं कर्तव्याकर्तव्यं वा विशदतया निरूपितम्। तस्माद् वेदार्थानां ज्ञानं परमावश्यकम्।

**वेदोऽखिलो धर्ममूलम्।।** (मनुस्मृतिः, २.६)

एवं वेदाध्ययनं जीवनं पावयति चिन्ताकुलं सत्पथं प्रेरयति। अतः व्याकरणस्य महती उपयोगिता वेदार्थ रक्षणाय।


1. वेदानां रक्षार्थं व्याकरणं अध्येतव्यं भवति
2. वेदानां मन्त्राणां सम्यग्–ज्ञानार्थं व्याकरणं आवश्यकं भवति

– शोधार्थी
**केन्द्रीयसंस्कृतविश्वविद्यालयः,**
**जयपुरपरिसरः, जयपुरम्**



# पदप्रहेलिका - ३

❑ मधुसूदनशर्मा ( प्राध्यापकः )



**वामतः दक्षिणम् -**

1. बलरामः, बलभद्रः (6)
5. जन्म, जनिः (2)
6. लौहनिर्मितः बाणः (3)
7. मेघमाला, मेघानां पङ्क्तिः (4)
9. शुक्लः, श्वेतः (3)
10. चिधातोः ल्युट्प्रत्ययान्तं रूपम् (4)
12. बुद्धिः, प्रज्ञा (1)
13. वक्षःस्थलम् (2)
14. वृक्षः, द्रुमः (विसर्गरहितः) (2)
15. लज्जा, व्रीडा (2)
16. शरीरम्, वपुः (2)
17. रम्-धातोः क्तप्रत्यये कृते पुंलिङ्गे प्रथमैकवचनरूपम् (2)
19. ध्या-धातोः तव्यत्प्रत्यये कृते स्त्रीलिङ्गे प्रथमैकवचनरूपम् (3)
20. हस्तः, करः (2)
21. पुत्रः, आत्मजः (3)
23. प्रियः, वल्लभः (विसर्गरहितः) (3)
25. ध्वनिः, शब्दः (2)
26. अमावस्या (2)
27. वायुयोगात् शब्दायमानः वंशः, महाभारते वर्णितः विराटराजस्य श्यालः सेनापतिश्च, यः भीमसेनेन हतः (3)

**उपरिष्टात् अधः -**

1. भगवतः परशुरामस्य माता (3)
2. राक्षसः, निशाचरः (5)
3. मनुष्याणाम् आदिपुरुषत्वेन प्रख्यातः प्रसिद्धस्य स्मृतिग्रन्थस्य रचयिता च (2)
4. हंसः, पक्षिविशेषः (3)
6. नौ-शब्दस्य द्वितीयैकवचनरूपम् (3)
8. करुणा, अनुकम्पा (2)
9. अर्जुनः, पार्थः (4)
11. वायुः, समीरः (3)
13. अध्यापकः, शिक्षकः (4)
14. सूर्यः, नौका (3)
16. आचार्यदण्डिना विरचितः सुप्रसिद्धः काव्यशास्त्रीयः ग्रन्थः (4)
18. अन्यः, अपरः (विसर्गरहितः) (3)
20. पापी (3)
22. नूतनः, नवीनः (2)
24. पत्न्याः भ्राता (2)

**पदप्रहेलिकायाः पूरणाय अवधातव्याः अंशाः -**

- लेखितव्य-पदस्य लेखनाय अपेक्षितखण्डानां संख्या कोष्ठके लिखिता अस्ति। निर्दिष्टसंख्याकेषु खण्डेषु एव तत् पदं लेखनीयम्।
- एकस्मिन् खण्डे एकः एव वर्णः लेख्यः। स्वतन्त्रः स्वरः, व्यञ्जनसहितः स्वरः वा वर्णः ज्ञेयः। कस्माच्चित् वर्णात् पूर्वं स्थितः स्वररहितः व्यञ्जनवर्णः तेन सह एव समानखण्डे लेखितव्यः। यथा-

| स | र | स्व | ती |
|---|---|---|---|

| अ | ङ्कः |
|---|---|

- पदान्ते स्थितः व्यञ्जनवर्णः तु भिन्नखण्डे एव लेखनीयः। यथा-

| मु | ख | म् |
|---|---|---|

| ज | ग | त् |
|---|---|---|

- ग्रामः कालेड़ा कँवरजी, जनपदः- अजयमेरुः (राज.)

प्रहेलिकां पूरयित्वा sanskritbharti09@gmail.com इत्यत्र प्रेष्यताम्। समीचीनोत्तरं प्रेषितवतां नामानि अग्रिमे अङ्के प्रकाशयिष्यन्ते।

पुस्तक-समीक्षा

# नूतनकाव्यसङ्ग्रहः

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

कविवर्यस्य डॉ. **कौशलतिवारिण**स्तृतीयो मुक्तककाव्यरचनासङ्ग्रहः **'स्मर्तव्योऽहं तदा'** शीर्षकवहः सम्प्रत्येव प्रकाशितः। कवेरस्य 'समरक्षेत्रम्' 'गुलिका' इति शीर्षकवहं मुक्तककाव्यसङ्ग्रहद्वयं पूर्वं प्रकाशितमभूत्। संग्रहेऽस्मिन् चतुर्विधाः काव्यरचनाः सङ्कलिताः सन्ति गजलगीति नामधारिणि प्रथमे वर्गे 34 गजलगीतयः, मुक्तछन्दोबद्धकाव्यानीत्यभिधानवहे द्वितीये वर्गे विभिन्नविषयानादाय छन्दोमुक्तरचनाः, तृतीये 'त्रिपादिकाकाव्यानि' शीर्षकवहे वर्गे विभिन्न विषयाणामुपरि केवलमतिसंक्षिप्तपंक्तित्रयबद्धाः काव्यरचनाः, चतुर्थे 'मुक्तककाव्यानि' शीर्षकवहे वर्गे चरणद्वयबद्धाः 55 मुक्तकरचनाः सङ्कलिताः सन्ति।

गजलगीतिः उर्दूभाषाप्रवर्तिता विद्याऽस्ति यस्या इयं पद्धतिः प्रसिद्धाऽस्ति यद् गजलगीतेः किमपि शीर्षकं न भवति यतो हि प्रत्येकपादे (शेर) विभिन्नं विषयवस्तु समभिहितं भवति, संपूर्णाया गजलगीतेरेकं विषयवस्तु न भवति इति तासां प्रथा। अस्मिन् संग्रहेऽपि 34 गजलरचनानां शीर्षकविधानं नाऽस्ति, यद्यपि एकस्यां गीतौ विषयवस्तु एकमेव दृश्यते। द्वितीये वर्गे **'राष्ट्रभक्तिः' 'म्रियन्ते कृषकाः'** 'इत्यादि-शीर्षकवहा मुक्तछन्दोबद्धकाव्यरचनाः संगृहीताः सन्ति, तृतीये वर्गे केवलं कतिपयाक्षरेषु निबद्धाभिस्त्रि-पादिकाभिः **'कविता' 'युद्धम्' 'पुस्तकम्'** इति विषयान् सूचयन् काव्यरचनात्रयं संगृहीतमस्ति। चतुर्थे वर्गे 'मुक्तककाव्यानि' शीर्षकवहे 55 चरणद्वयबद्धाः विविधविषयिण्यः काव्यरचनाः संगृहीताः सन्ति। अनेन स्पष्टीभवति यदस्मिन् संग्रहे कविना कतिपये नूतनाः प्रयोगाः परिदर्शिताः।

प्रारम्भे विद्वन्मूर्धन्यस्य पूर्वकुलपतिवर्यस्य डॉ. राधावल्लभत्रिपाठिनः 'अभिमतम्' कविवर्यस्य डॉ. प्रवीण पंड्या इत्यस्य पुरोवाक् च संस्कृते, अरुणकुमार- निषादस्य, स्वयं कवेः डॉ. कौशल तिवारिणश्च हृदयोद्गारः, **अपनी बात** इति हिन्द्यां मुद्रिताः सन्ति। अभिनन्द्यते युवा कविवर्यो डॉ. कौशल तिवारी नूतनस्यास्य प्रकाशनस्योपलक्ष्ये।

स्मर्तव्योऽहं तदा (नूतनमुक्तककाव्य-रचनासंग्रहः) कविः - डॉ. कौशलतिवारी, प्रकाशक - एजुकेशनल बुक सर्विस, उत्तमनगर, नई दिल्ली, 59, पृ.सं. 95, मूल्यम् 400/-

# भारतीयभाषाकथाः संस्कृते

अस्माकं देववाण्यां प्राचीनतमायां भाषायामपि नवीनतमस्य साहित्यस्यावतारणा भवति, नवीनतमस्य भाषान्तरसाहित्यस्यानुवादोऽप्यवतरतीति सन्तोषस्य गौरवस्य चास्ति विषयः। एतस्य प्रमाणरूपेण सद्य एव भारतीयभाषासु विलिखितानां लघुकथानां संस्कृतानुवादं प्रस्तुवन्ती **'अभिनवकथा-मञ्जरी'** प्रकाशिताऽस्ति यस्यां विविधभारतीय-भाषाभ्यः 24 लघुकथानां संस्कृतानुवादो द्रष्टुं शक्यः।

अनेकेषां ग्रन्थानां प्रणेत्रा राष्ट्रपतिसम्मानितेन विद्वन्मूर्धन्येन श्रीगङ्गानगरवासिना **प्रो.सत्यव्रतवर्मणा** विहितोऽस्त्ययमनुवादः।

गतेषु दशकेषु हिन्दी-उर्दू-वङ्गभाषा-राजस्थानी-पंजाबी-उड़िया-मलयालम-नेपाली-तेलुगु प्रभृतिभाषासु प्रकाशितानां प्रमुखकथानां सुरुचिरायां, प्रौढ्-प्राञ्जलशैल्यां विहितस्य संस्कृतानुवादस्य संग्रहोऽयं पाठकैः सबहुमानं स्वीकरिष्यते इति स्पष्टमेव। अत्र द्वादश कथा हिन्दीभाषातोऽनूदिताः, कथाद्वयं वङ्गभाषातः, कथात्रयमुर्दूभाषातः, कथाद्वयं राजस्थानीभाषातः, अन्यभाषाभ्यश्चैकैकाः कथा अनूदिताः सन्ति। कतिपयाः सुप्रथिताः कथा अत्र संस्कृते उपलप्स्यन्ते इति प्रमोदास्पदं, यथा कविवर्यस्य रवीन्द्रनाथ-ठाकुरवर्यस्य कथा 'काबुलीवाला' **'काबुली'** शीर्षकेण प्रस्तुताऽस्ति। संग्रहेऽस्मिन् केवल मूलकथालेखकानां नाम प्रारम्भे सूचितमस्ति, कथायाः शीर्षकं नैव सूचितम्, तस्य संस्कृतानुवाद एव शीर्षकरूपेण पाठकैर्दृश्येत। **एकस्याः कथायाः** (शबला शाटिका) **लेखकस्य नामाऽपि न सूचितम्**।

भारतीयभाषाकथानां कुशलः पाठकः कथाऽनुवादं पठित्वा तस्याः कथायाः मूलशीर्षकं यदि स्मरेत्तर्हि तस्य बुद्धिपरीक्षाऽप्यनेन भवेदेव। **'सआदत हसन मंटो'** इत्याख्यस्य उर्दूकथाकारस्य प्रसिद्धा कथा 'टोबा टेकसिंह' अत्राऽनूदिताऽस्ति। अस्याः शीर्षकं यथावत् सूचितमस्तीति स्मरिष्यन्ति पाठकाः कथाया अस्या इतिहासम्। अन्यासां कथानां शीर्षकाणि संस्कृते सन्ति।

विभिन्नभारतीयभाषाणां लघुकथा आधुनिक-साहित्यस्य परिदृश्यं संस्कृतभाषा-माध्यमेनाऽत्र प्रस्तुवन्तीति सर्वात्मना स्वागतार्हमेतादृशं प्रकाशनम्। वर्धापयामो विद्वद्वर्यं डॉ. **सत्यव्रतवर्म**महाभागमेतस्य प्रकाशनस्योपलक्ष्ये। सुपरीचितोऽस्ति सुधीवर्यः सत्यव्रतवर्मा भारतीपाठकानाम्।

**अभिनव-कथामञ्जरी**, भाषान्तरकारः प्रो.सत्यव्रतवर्मा, प्राप्तिस्थानम् 7/34, पुरानी आबादी, नामदेव फ्लोर मिल के पास, श्रीगंगानगर, पृ.सं. 140, मू. 300/-

## काङ्करकाव्यसङ्ग्रहः

राष्ट्रपतिसम्मानितस्य विद्वत्प्रवरस्य **डॉ.नारायणशास्त्रिणः** काङ्करस्य समये समये प्रणीतानां काव्यरचनानां सङ्ग्रहः **'मानस-महाकाव्यम्'** शीर्षकवहः प्रसादयेत् काव्यरसिकान्। पञ्चदशसर्गेषु महाकाव्येऽस्मिन् विभिन्नविषयिण्यः काव्यरचना विनिविष्टाः सन्ति यथा नारीसर्गे नारीविषयिण्यः, सैनिकसर्गे सैनिकविषयिण्यः, देववाणीसर्गे संस्कृतभाषामहत्त्वविषयिण्यः पद्यरचनाः सन्ति। **संस्कृतसुषमासप्तशती**नाम्नः स्वकीयग्रन्थस्य या प्रस्तावना विद्वद्वर्येण विलिखिताऽऽसीत् सा चतुर्दशसर्गे प्रस्तौति संस्कृतसुषमासप्तशती - प्रस्तावना सर्गनाम्ना, राष्ट्रस्मृतिपरस्य ग्रन्थस्य प्रस्तावना एकादशसर्गरूपेण राष्ट्रस्मृतिप्रस्तावना सर्गनाम्ना मुद्रिताऽस्ति। सम्बोधन- सर्गे पञ्चदशे लेखनीं प्रति, मित्रं प्रति, ब्राह्मणबान्धवान् प्रति, इत्थं पञ्च सम्बोधनानि सङ्कलितानि।

इत्थं समस्तेऽपि काव्ये 1610 श्लोकाः सन्तीति सर्गानुक्रमे सूचितमस्ति। अनेन स्पष्टीक्रियते यन्महाकाव्यमिदं न कस्याश्चनैकस्याः कथायाः प्रबन्धकाव्यमपि तु विविधविषयिणीनां रचनानां संकलनकाव्यमस्ति। षष्ठः सर्गो मुक्तकसर्गनाम्नाऽभिहितोऽस्ति, दशमः सर्गः सूक्तिसर्गनाम्ना। समस्तेऽपि काव्ये जनहितकारिण्यः प्रेरणाः, सत्परामर्शाः, युगप्रबोधनाश्चापि पाठकान् सर्वथोपकुर्युरिति स्पष्टमेव। वर्तमानयुगस्य विडम्बनानां न्यकारः कलिकालसर्गे सूचितोऽस्ति। सामाजिकीं स्थितिं वीक्ष्य ग्रन्थकर्तुर्मानसे ये विचारा उद्गतास्तेषामभिव्यक्तिः द्वादशे उद्गारसर्गे परिदृश्यते। तृतीये युगधर्मसर्गे गुरु-शिष्यसंवादरूपेण धनस्याधुनिकयुगे यन्महत्त्वमस्ति तत् संसूच्य शिष्यं प्रति गुरोरुपदेशः प्रस्तुतोऽस्ति।

काव्येऽस्मिन् पाठकानां सौकर्याय प्रतिपद्यं हिन्द्यामनुवादः सहैव मुद्रितोऽस्ति। समस्ते काव्ये न हि कस्यचनैकस्य छन्दसः प्रयोगोऽस्ति, सुविधानुसारम् अनुष्टुप्, उपजातिप्रभृतिसरलच्छन्दसां यथायथमुपयोगः कृतोऽस्ति, कुत्रचन छन्दोमुक्तरचना अपि द्रष्टुं शक्यन्ते।

ग्रन्थस्य प्रारम्भे प्रो. **सत्यव्रतशास्त्रिणो** भूमिका पद्यबद्धा मुद्रिताऽस्ति, स्वामिमहेश्वरानन्दस्य शुभाशिषः, राजस्थानमुख्यमन्त्रि-शिक्षामन्त्रिप्रभृतीनां शुभकामना-सन्देशाः, प्रदेशस्य विख्यातानां विदुषां शुभाशंसाश्चापि मुद्रिताः सन्ति। विद्वत्प्रवरस्य काङ्करमहोदयस्य नूतनं प्रकाशनमिदं सहर्षमभिनन्द्यते, स्वागतं चाऽस्य समुद्घोष्यते।

**मानसमहाकाव्यम्;** रचयिता आचार्य डॉ.नारायणशास्त्रीकाङ्करः, सम्पादकः वैद्य रामशर्मा काङ्करः, हिन्दी रूपान्तरणकर्त्री श्रीमती सौ. इन्दु शर्मा, प्रकाशकः– विद्यावैभवभवनम्, 29, केसरविहारः, जगत्पुरा, जयपुरम्, पृ.सं. 310, मूल्यम् 600/-


हार्दिक शुभकामनों सहित :-

निर्माता

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

**एस्बेस्टोस सीमेन्ट पाइप्स**

**सस्ता, मजबूत एवं टिकाऊ**

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

**एवं**

निर्माता

**एस्बेस्टोस सीमेन्ट शीट्स**

**छत एक, लाभ अनेक**

**उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें**

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-9ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

नारी-स्तम्भः

# पद्मत्रयेण प्रभासते प्रभा अत्रे

❑ डॉ. राजेश्वरी भट्टः

जानन्त्येव भवन्तो यद् राष्ट्रे, सर्वोच्चेषु, महनीयेषु दुर्लभेषु पद्मश्री, पद्मभूषण, पद्मविभूषण, इति त्रिषु पुरस्कारेषु एकेनापि पुरस्कृतो मानवः समाजे धन्यो मान्योऽग्रगण्यो मन्यते। ततोऽपि धन्यधन्याऽस्ति स्वरसाम्राज्ञी 'प्रभाअत्रे' या त्रिभिःपुरस्कारैः पुरस्कृता विश्वस्मिन् विश्वे दिव्यप्रभामण्डलेन प्रभासते। विंशति-शताब्द्याः संगीतसाधकेषु अग्रगण्या 'प्रभाअत्रे' शास्त्रीयसंगीतस्य लोकप्रियतां वैश्विकस्तरे प्रसारयितुं महतीं भूमिकां निरवहत्। संगीतस्य विविधासु विधासु नदीष्णा, लेखन-अभिनय-नृत्य-संगीतादिषु, विभिन्नासु कलासु प्रवीणा कोकिलकंठी 'प्रभाअत्रे' 'महाराष्ट्रप्रदेशे' पुणेनगरे मध्यमवर्गीये ब्राह्मणपरिवारे जनिमलभत। अस्याः पितरौ सरस्वतीसमुपासकौ विद्यालये अध्यापन कार्ये संलग्नौ आस्ताम्। आर्थिकदृष्ट्या सम्पन्नताया अभावेऽपि पिता कन्यायाः समुचितसमुन्नत्यै प्रयत्नवानासीत्। बाल्यादेव 'प्रभायाः' संगीतविषये अत्यधिका रुचिरासीत्। एकदा 'प्रभाअत्रे' महाभागाया मातुरस्वस्थतामनुभूय परिवारस्य हितैषिणा मित्रेणैकेन चिकित्सारूपेण तस्यै संगीतं श्रावयितुं सम्प्रेरिता सा, तद्दिनात् प्रभा पारम्परिकसंगीतक्षेत्रे पदं कृतवती। बहुमुखी-प्रतिभासम्पन्ना 'प्रभाअत्रे' अध्ययनेऽपि कुशाग्र बुद्धिसम्पन्ना आसीत्। पुणे विश्वविद्यालयतः विज्ञानविषये 'स्नातक' उपाधिमधिगम्य ततः 'बैचलर ऑफ लॉ' इत्युपाधिना सम्मानिता जाता। अध्ययनानन्तरं 'प्रभाअत्रे' संगीतक्षेत्रे सर्वथा समर्पिता जाता। पूर्वं इयं पारम्परिकशास्त्रीय-संगीतस्य प्रशिक्षणं तत्समये संगीतक्षेत्रे बहुश्रुतस्य 'विजयकरन्दीकरस्य सन्निधौ प्राप्तवती ततः संगीतक्षेत्रे वैशारद्यमधिगन्तुं संगीतविधायां पारंगतस्य 'सुरेशबाबूमाने' सानिध्ये स्वरसाधनां कृतवती। अनन्तरं सप्तस्वरैः सह खेलन्त्या हीराबाईबड़ोदकरस्य सन्निधौ स्वरान् साधयामास। पारम्परिक- शास्त्रीयसंगीतेन सह मधुरकण्ठी 'प्रभाअत्रे' 'लंदनतः' पश्चिमी-संगीतस्य प्रशिक्षणं प्राप्तवती। शास्त्रीयसंगीतक्षेत्रे शीर्षस्थासु पार्श्वगायिकासु दुर्लभा संगीतज्ञा 'प्रभाअत्रे' ख्याल, ठुमरी, गजल, गीतादिषु विधासु निष्णाताऽस्ति। 'प्रभाअत्रे' द्वारा 500 संगीतरचनाः स्वरबद्धाः कृताः। संगीतविषयमधिकृत्य प्रभाअत्रे महाभागाया अनेका रचना वर्त्तते, यासु 'स्वरमयी' इति कृतौ विदुष्याः 'प्रभा' महाभागया विरचितानां लेखानां संग्रहो वर्तते। विश्वविश्रुतायाः संगीतकृते श्वसन्त्याः स्वरसाधिकाया महती स्वरसाधना, सर्वतोमुखी प्रतिभा च लोके महता आदरेण गौरवेण च अभिनन्दिता। एतत्कृते प्रभा अत्रे अनेकैः पुरस्कारैः सम्मानैश्च सम्मानिता जाता-

(अ) 1991 - संगीतनाटक अकादमी पुरस्कारः

( ब ) 1990 - पद्मश्री-पुरस्कारः

( स ) 2002 - पद्मभूषण-पुरस्कारः

( द ) 2022 - पद्मविभूषण-पुरस्कारः

**राष्ट्रस्य महनीयैः पुरस्कारैः पुरस्कृता 'प्रभाअत्रे' अद्यापि संगीतसंसारे रमते। दीर्घकालात् इयं गुरुकुले संगीतगुरुरूपेण संलग्ना वर्तते। अद्य प्रभाअत्रे महोदयाया बहवः शिष्या अनेका छात्राश्च लोके संगीतप्रशिक्षणे संस्कृतिसंरक्षणे च संलग्ना दृश्यन्ते। निखिलं जीवनं नादब्रह्म प्रति समर्पयन्ती प्रभा अत्रे लोके प्रेरणास्पदीभूता वर्तते।**

## हिन्दी अनुवाद

सभी को विदित है कि राष्ट्र में सर्वोच्च, महनीय एवं दुर्लभ पद्मश्री, पद्मभूषण एवं पद्मविभूषण इन तीन पुरस्कारों में से एक पुरस्कार से सम्मानित व्यक्ति भी समाज में धन्य, मान्य एवं अग्रगण्य माना जाता है किन्तु धन्य धन्य है स्वरसाम्राज्ञी 'प्रभाअत्रे' जो इन तीनों सम्मानों से पुरस्कृत होकर समस्त विश्व में दिव्य प्रभामण्डल से प्रभासित है। बीसवीं शताब्दी के संगीत साधकों में अग्रगण्य 'प्रभाअत्रे' ने शास्त्रीय संगीत की लोकप्रियता विश्वस्तर पर प्रसारित करने के लिए महत्वपूर्ण भूमिका का निर्वहन किया। संगीत की विविध विधाओं में पारंगत एवं लेखन-अभिनय-नृत्य-संगीत आदि विभिन्न कलाओं में प्रवीण कोकिलकंठी, 'प्रभाअत्रे' का जन्म **महाराष्ट्र** प्रदेश के 'पुणे नगर' में मध्यमवर्गीय ब्राह्मणपरिवार में हुआ। इनके पिता-माता सरस्वती के उपासक, विद्यालय में अध्यापन कार्य में संलग्न थे। आर्थिक दृष्टि से सम्पन्नता का अभाव होने पर भी इनके पिता कन्या के समुचित विकास के लिए प्रयत्नशील थे। बालिका 'प्रभा' की बचपन से ही संगीत के प्रति अत्यधिक रुचि थी किन्तु पारम्परिक 'संगीत क्षेत्र' से 'प्रभाअत्रे' सर्वथा अनभिज्ञ थी। एक दिन 'प्रभाअत्रे' की माता को अस्वस्थ देखकर परिवार के किसी हितैषी मित्र ने चिकित्सारूप में उन्हें संगीत सुनने का सुझाव दिया। तभी से 'प्रभाअत्रे' शास्त्रीय संगीत क्षेत्र में प्रविष्ट हुई। बहुमुखी प्रतिभासम्पन्ना प्रभाअत्रे अध्ययन में भी कुशाग्र बुद्धि सम्पन्न थी। 'पुणे विश्वविद्यालय' से **'बैचलर ऑफ लॉ'** उपाधि से सम्मानित हुई। अध्ययन के अनन्तर प्रभाअत्रे संगीत क्षेत्र में सर्वथा समर्पित हो गई। पूर्व में इन्होंने शास्त्रीय संगीत का प्रशिक्षण उस समय संगीत क्षेत्र में विख्यात **'विजयकरन्दीकर'** के सानिध्य में प्राप्त किया तत्पश्चात् संगीत के क्षेत्र में अधिक निपुणता प्राप्त करने के लिए 'संगीत विद्या' में जाने-माने लोकप्रसिद्ध **'सुरेशबाबू माने'** के निर्देशन में स्वरसाधना की। इसी क्रम में संगीत के प्रति समर्पित 'प्रभाअत्रे' ने ससस्वरों के साथ क्रीड़ा करने वाली **हीरा बड़ोदकर** की सन्निधि में स्वरसाधना की। पारम्परिक शास्त्रीय संगीत के साथ ही मधुरकण्ठी प्रभा जी ने 'लंदन' से पश्चिमी संगीत का प्रशिक्षण प्राप्त किया। शास्त्रीय संगीत के क्षेत्र में शीर्षस्थ पार्श्वगायिकाओं में दुर्लभ, संगीतज्ञा 'प्रभाअत्रे' ख्याल, ठुमरी, गजल, गीतादि विधाओं में निष्णात हैं। प्रभाअत्रे द्वारा 500

संगीत रचना स्वरबद्ध की गई। संगीत विषय में प्रभाअत्रे की अनेक रचनाएँ उपलब्ध हैं, जिनमें **'स्वरमयी'** रचना में विदुषी 'प्रभाअत्रे' द्वारा विरचित लेखों का संग्रह है। विश्व में विख्यात, संगीत को ही प्राणों का आधार मानने वाली स्वरसाधिका की महत्ती स्वरसाधना, सर्वतोमुखी प्रतिभा लोक में अत्यन्त आदर एवं गौरव से अभिनन्दित है। उसके लिए माननीय प्रभाअत्रे अनेक पुरस्कारों एवं सम्मान समारोहों से सम्मानित है-

(अ) 1991 – संगीतनाटक अकादमी पुरस्कार

(ब) 1990 – पद्मश्री पुरस्कार

(स) 2002 – पद्मभूषण पुरस्कार

(द) 2022 – पद्मविभूषण पुरस्कार

राष्ट्र के महनीय पुरस्कारों से पुरस्कृत 'प्रभाअत्रे' आज भी संगीत संसार में रमण कर रही है। दीर्घकाल से 'प्रभाअत्रे' गुरुकुल में संगीतगुरु के रूप में संलग्न है। वर्तमान में 'प्रभाअत्रे' के अनेक शिष्य एवं शिष्याएँ लोक में संगीत प्रशिक्षण एवं संस्कृति संरक्षण के क्षेत्र में संलग्न हैं। सम्पूर्ण जीवन नाद ब्रह्म के प्रति समर्पित करने वाली प्रभाअत्रे निश्चय ही प्रेरणामयी है।

**- पूर्व-संस्कृतविभागाध्यक्षा,**
**लालबहादुर-शास्त्री कॉलेज, जयपुर।**

## उत्तराणि ( पदप्रहेलिका - २ )

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 1 वि | ना | 2 य | कः | | 3 आ | जी | 4 वि | का |
| प्रः | | मु | | वै | द्यः | | हा | |
| | 6 से | ना | 7 नी | | | 8 भ | र | 9 त |
| 10 शि | वा | | 11 र | स | 12 ना | | | न |
| ख | | 13 व्या | धिः | | रा | | 14 च | यः |
| 15 र | सा | लः | | | 16 च | 17 तु | रः | |
| म् | | | 18 उ | रः | | र | | 19 द्या |
| | 20 न | रे | श | | 21 म | ङ्ग | 22 ल | म् |
| 23 का | लः | | 24 ना | र | दः | | क्ष्म | |


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 150/–, पंचवर्षीय शुल्क 700/–, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**

खाता संख्या – **2139101912498**

**IFS Code - CNRB0002139**

आयुर्वेद-स्तम्भः

# वर्षाकालो हि विसर्गकालः

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**आयुर्वेदे हि क्रमात्मासैर्द्विसंख्यैर्माघाद्यैः षड्ऋतवः स्मृताः। एते हि शिशिरोऽथ वसन्तश्च-ग्रीष्मवर्षाशरद्धिमाःइत्यात्मकाःभवन्ति। शिशिराद्यास्त्रिभिस्तैस्तूत्तरमयनं विद्यात्।**

**उत्तरायणमेवादानं भवति, तत्प्रतिदिनं नृणां बलम्आदत्ते। व्याख्याकारश्चक्रपाणिःस्पष्टयति यदुदग् उत्तरां दिशं प्रति, अयनं गमनमुदगयनम्। आददाति क्षपयति पृथिव्याः सौम्यांशं प्राणिनां च बलमित्यादानम्। शिशिरे ह्यादानकालस्य प्रारम्भो भवति। आदानस्य तृतीयोऽन्तिमश्च कालः ग्रीष्मर्तुः भवति, तस्मिनृतौ तु भगवान्नादित्यःमयूखैर्जगतः स्नेहं पेपीयते। अतः ग्रीष्मे बलस्य ह्रासो विशेषेण भवति। यद्यपि वर्षासु विसर्गकालस्य प्रारम्भो भवति तर्ह्यप्यादानस्योत्तमकालस्य ग्रीष्मस्यानन्तरमेव विसर्गात्मकः वर्षाकालः प्रारभ्यतेऽत एव देहोऽपि दुर्बलो भवति देहस्थः पक्तापि दुर्बलो भवत्यत एव द्वयोरपि संरक्षणं विशेषेण करणीयं भवति।**

आयुर्वेद में क्रमशः माघ आदि दो-दो महीनों की छः ऋतुयें होती हैं। ये ऋतुयें शिशिर, वसन्त, ग्रीष्म, वर्षा, शरद् और हेमन्त होती हैं। शिशिर आदि तीन ऋतुयें उत्तरायण होती हैं। उत्तरायण ही **आदान** होता है, यह प्रतिदिन मनुष्यों के सौम्य अंश को ग्रहण करता है। व्याख्याकार चक्रपाणि स्पष्ट करते हैं कि इस समय सूर्य उत्तर दिशा के अयन (मार्ग) से होकर गमन करता है, इसलिए यह **उदगयन** कहलाता है। पृथिवी के सौम्यांश और प्राणियों के बल को ग्रहण करता है अर्थात् क्षय करता है इसलिए आदान कहलाता है। शिशिर में आदानकाल का प्रारम्भ होता है। आदान का तृतीय अन्तिम काल ग्रीष्म ऋतु होता है। इस ऋतु में तो भगवान् सूर्य अपनी किरणों से संसार के स्नेह को अत्यधिक पीते हैं। अतः ग्रीष्म में बल का ह्रास विशेष रूप से होता है। यद्यपि वर्षा में **विसर्गकाल** प्रारम्भ होता है तो आदान के उत्तम काल ग्रीष्म के बाद विसर्गात्मक वर्षाकाल प्रारम्भ होता है, अतः देह भी दुर्बल होती है, देहस्थ पाचकाग्नि भी दुर्बल होती हैं, अतः इन दोनों का संरक्षण विशेष रूप से करना होता है।

**आचार्येण चरकेण सूत्रस्थानस्य मात्राशितीयनामके पञ्चमेऽध्याये मात्रावदाहारस्य बलादिहेतुत्वं प्रतिपादितं, तच्च ऋतुसात्म्यमपेक्ष्य कृतस्याहारस्यैव भवति; तेन, ऋतुप्रविभागपूर्वकमृतुसात्म्याभिधायकं तस्याशितीयं नामकमध्यायमाचार्यश्चरको ब्रूते। तत्राचार्यः कथयति यद्येन जनेन चेष्टाहारव्यपाश्रयम् ऋतुसात्म्यं विदितं तस्याशितपीतलीढजग्धादाहाराद् बलं वर्णश्च वर्धते स्वास्थ्यस्यानुवर्तनञ्चापि भवति ऋतुजनितेभ्यः रोगेभ्यश्च पूर्णरूपेण संरक्षणम्भवति। 'बलं वर्णश्च**

**वर्धते' इति वचनं स्पष्टयति व्याख्याकारश्चक्रपाणिः, यथा-**

**बलं वर्णश्चेति चकारेण पूर्वाध्यायोक्तसुखायुषी अपि गृह्येते; यदि वा बलवर्णाभ्यामेव नान्तरीयकं कृत्स्नं धातुसाम्यकार्यं सुखादि गृह्यते। विदितमित्यनेन सम्यक्ज्ञानपूर्वकमृतुसात्म्यानुष्ठानं दर्शयति। चेष्टाग्रहणेन व्यवायव्यायामाभ्यङ्गादीनां ग्रहणम्। चेष्टाहारव्यपाश्रयं चेष्टाहारगोचरम्।। (च.सू.6/ 3 चक्रपाणिः)।**

आचार्य चरक द्वारा सूत्रस्थान के मात्राशितीयनामक पंचम अध्याय में मात्रावत् आहार का बलादिहेतुत्व प्रतिपादित किया है, वह ऋतुसात्म्य की अपेक्षा के अनुसार किये गये आहार के कारण होता है; ऋतुप्रविभागपूर्वक ऋतुसात्म्य को बताने वाले तस्याशितीय नामक अध्याय में आचार्य चरक वहाँ कहते हैं कि यदि मनुष्य को चेष्टाहारव्यपाश्रय ऋतुसात्म्य का ज्ञान है तो तदनुसारअशित, पीत, लीढ (चाटकर खाए गए) एवं जग्ध (चबाकर खाए गए) आहार के सेवन से बल, वर्ण बढ़ते हैं और स्वास्थ्य का अनुवर्तन भी होता है तथा ऋतुजनित रोगों से पूर्णरूप से संरक्षण होता है।'बल और वर्ण बढ़ते हैं' इस वचन को व्याख्याकार **चक्रपाणि** स्पष्ट करते हैं, यथा-

'बलं वर्णश्च' (बल और वर्ण) यहाँ चकार से पूर्वाध्याय में बताये गये सुख और आयु का भी ग्रहण होता है; या बल, वर्ण से ही इनके अन्तर्गत समस्त धातुसाम्यकार्य सुखादि का भी ग्रहण हो जाता है। विदित का अर्थ सम्यक्ज्ञानपूर्वक ऋतुसात्म्य का अनुष्ठान बताते हैं। चेष्टा का ग्रहण करने से व्यवाय, व्यायाम, अभ्यङ्ग आदि का ग्रहण किया गया है। चेष्टाहारव्यपाश्रय का अर्थ चेष्टाहारगोचर कहा गया है।

**वर्षाशरद्धेमन्तर्तवस्तु विसर्गस्वरूपाः भवन्ति तथायनन्तु दक्षिणायनम्भवति। दक्षिणां दिशं प्रति अयनं दक्षिणायनम्। विसृजति जनयति आप्यमंशं प्राणिनां च बलमिति विसर्गः।एतत् सञ्ज्ञाप्रणयनं च व्यवहारार्थं, निरुक्तिप्रतीयमानार्थप्रतिपादनार्थं च। कालेऽस्मिन् सोमश्चाव्याहतबलः शिशिराभिर्भाभिरापूरयञ्जगदाप्याययति शश्वत्, अतो विसर्गः सौम्यः। आदानं पुनराग्नेयं; तावेतावर्कवायू सोमश्च कालस्वभावमार्गपरिगृहीताः कालर्तुरसदोषदेहबलनिर्वृत्तिप्रत्ययभूताः समुपदिश्यन्ते। एतत् सर्वं सम्यगवलोक्यैव चेष्टाहारव्यपाश्रयस्यर्तुसात्म्यस्य परिपालनङ्करणीयम्। अत्र संक्षेपेण तस्योल्लेखः क्रियते-**

वर्षा, शरद् और हेमन्त ऋतुयें तो विसर्गस्वरूप होती हैं तथा अयन तो दक्षिणायन होता है।इस समय सूर्य दक्षिण दिशा की ओर वाले अयन (मार्ग) से गमन करता है, इसलिए **दक्षिणायन** कहते हैं। आप्य अंश और प्राणियों के बल का विसृजन अर्थात् उत्पादन करता है इसलिए विसर्ग कहलाता है। यह सञ्ज्ञाप्रणयन व्यवहार के लिए है, तथा निरुक्तिप्रतीयमान अर्थप्रतिपादन के लिए है। इस काल में अव्याहतबल वाला सोमशिशिर किरणों द्वारा संसार का निरन्तर आप्यायन करता है, अतः **विसर्ग**

सौम्य होता है। आदान आग्नेय होता है; ये दोनों सूर्य, वायु और सोम कालस्वभाव से मार्ग का परिग्रहण कर काल, ऋतु, रस, दोष, देहबल की निर्वृत्ति (उत्पत्ति) के कारणके रूप में उपदिष्ट किये जाते हैं। यह सब सम्यक्तया देखकर ही चेष्टा एवं आहारसम्बन्धी ऋतुसात्म्य का परिपालन करना चाहिये। यहाँ संक्षेप में इसका उल्लेख किया जा रहा है-

**1. भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्, तत्र यदि निम्बुस्वरसस्यापि किंचित् सम्मिश्रणं भवेत्तदा तूत्कृष्टं भवति ।अनेनाग्निसंधुक्षणं भवति,किंत्वस्य प्रयोगो विरम्य विरम्यैव करणीयः, निरंतरं ह्यस्य प्रयोगो न करणीयः ।**

**2. वर्षाकाले शीतकाले च भोजनात्पूर्वमेकं लवङ्गं तुलसीदलत्रयं गोस्तनीश्च पंचसंख्यात्मिकाःगृहीत्वा सम्यक्पिष्ट्वा लेहयेत्। पञ्चदिनात्मक एवैष प्रयोगः समुचितः ।**

**3. भोजनात्पूर्वमेव 'अविपत्तिकरचूर्णस्य' प्रयोगः मासैकपर्यन्तः करणीयः। पश्चादपि वैद्यनिर्देशेन कर्तुं शक्नोत्यग्निमान्द्याम्लपित्ताभ्यां पीडितो जनः ।**

1. भोजन से पहले **सैन्धव** लवण और **अदरक** का भक्षण सदा पथ्य है, इसमें यदि **निम्बुस्वरस** का भी कुछ सम्मिश्रण कर दिया जाये तो उत्कृष्ट होता है। इससे अग्निसंधुक्षण होता है, किंतु इसका प्रयोग छोड़-छोड़ कर ही करना चाहिये,इसका निरंतर प्रयोग नहीं करना चाहिये।

2. वर्षाकाल और शीतकाल में भोजन से पूर्व एक **लवङ्ग, तीन तुलसीपत्र** और **पांच मुनक्का** लेकर सम्यक्पीसकर लेहन करना चाहिये। इसका प्रयोग पांच दिन तक ही समुचित है।

3. भोजन से पूर्व '**अविपत्तिकरचूर्ण**' का प्रयोग एक मासपर्यन्त करना चाहिये। अग्निमान्द्य एवं अम्लपित्त से पीडित व्यक्ति द्वारा इसके पश्चात् भी वैद्य के निर्देश से किया जा सकता है ।

**4. प्रावृष्यान्तरिक्षं जलं परं पथ्यम्। नदीसम्भवं त्वपथ्यम्।**

**5. वर्षतौ घृते तैले वा तलितान् मधुरानपूपान् तैल एव तलितान् पित्तकारिसंयुक्तान् लवण-रक्तमरिच-प्रधानान् पकौड़ी इत्याख्यानम्लरागेण भक्षयेत्।**

**6. वर्षासु मधुराम्ललवणात्मकानां द्रव्याणां प्रयोगः विशेषेण करणीयः।**

**7. आदानग्लानवपुषामग्निः सन्नोऽपि सीदति। अत एव भजेत्साधारणं सर्वमूष्मणस्तेजनं च यत् ।**

**8. उपरि निर्दिष्टान् तैल एव तलितान् पित्तकारीसंयुक्तान् लवण-रक्तमरिचप्रधानान् पकौड़ी इत्याख्यानां प्रयोगस्तु कादाचित्क एव। यतो हि कालेऽस्मिन् स्वभावत एव पित्तस्य सञ्चयो भवति। कट्वम्लप्रधानान्येतानि व्यञ्जनानि पित्तस्याभिवृद्धिङ्कुर्वन्ति ।**

4. प्रावृट् ऋतु में आन्तरिक्ष (बरसात का बरसा हुआ) जल अत्यन्त पथ्य है। नदी का जल तो अपथ्य है।

5. वर्षा ऋतु में घृत या तैल में तले हुए मधुर पूये और तैल में ही तले हुए पित्तकारक हरी मिर्च (**पित्तकारी**= गाँवों में हरी मिर्च को **पितकाली** कहते हैं), लवण तथा लाल मिर्च प्रधान पकौड़ी इत्यादि को अम्ल चटनी से खाये।

6. वर्षा में मधुर, अम्ल, लवण प्रधान द्रव्यों का प्रयोग विशेष रूप से करना चाहिए।

7. इस समय आदानकाल से त्रस्त मनुष्यों की अग्नि और भी अधिक मन्द हो जाती है। अतः सब साधारण विधि और जो जाठराग्नि को तेज करने वाले आहार-विहार हैं उनका प्रयोग करना चाहिये।

8. ऊपर निर्दिष्ट तैल में तले हुए **पित्तकारी** (हरीमिर्च) संयुक्त लवण-लाल मिर्चप्रधान पकौड़ी इत्यादि का प्रयोग कभी-कभी ही करना चाहिये। क्योंकि इस काल में स्वभाव से ही पित्त का सञ्चय होता है। कटु, अम्ल प्रधान ये व्यञ्जन पित्त की अभिवृद्धि करते हैं।

**9. वर्षाभ्वौ-ह्रस्वमहत्यौ रक्तश्वेतपुनर्नवे भवतः। 'शाटी' इति नाम्ना ख्याते ह्येते ग्रामीणक्षेत्रेषु जानन्ति जनाः। अनयोः पत्राणां शाकनिर्माणं कुर्वन्ति ग्रामीणाः, अधुना त्वनयोः प्रयोगेऽपि न्यूनता समायाता। अनयोः समुत्पत्तिस्तु वर्षाकाल एव जायते। आचार्यः वाग्भटः कथयति यत्-**

**'वर्षाभ्वौ कफवातघ्नौ हितौ शोफोदरार्शसाम्।'**

**10. त्रिफला- गुडूची- त्रिवृता- कटुरोहिणी- वासा- कण्टकारि-पुनर्नवेत्येतेषां समधृतानां द्रव्याणां समेषां विंशतिग्राममात्रायां ग्रहणङ् कृत्वा क्राथविधिना क्राथं विधाय पञ्चदिनानि यावत्प्रयोगो वर्षाकाले विधेयः। अनेन वर्षाकालजनितः ज्वरो न भवति पित्तस्य सञ्चयश्चापि न जायते।**

**11. केवलस्य गुडूचीस्वरसस्यापि पञ्चदश मिलिलिटरमात्रायां प्रयोगो दशदिनपर्यन्तः करणीयः।**

9. ह्रस्व और बडीवर्षाभू रक्त और श्वेतपुनर्नवा होती हैं। ग्रामीण क्षेत्रों में लोग इन्हें '**शाटी**' इस नाम से जानते हैं। ग्रामीण इनके पत्तों का शाक निर्माण करते हैं, इन दिनों इनके प्रयोग में भी न्यूनता आई है। इनकी समुत्पत्ति तो वर्षाकाल में ही होती है। आचार्य **वाग्भट** कहते हैं कि **वर्षाभू** कफवातघ्न होती हैं, शोफ, उदररोग और अर्शोरोग में हितकर होती हैं।

10. त्रिफला-गुडूची-त्रिवृता(निशोथ)-कटुरोहिणी (कुटकी)-वासा(अडूसा)-कण्टकारि-पुनर्नवा इन द्रव्यों को समान भाग में लेकर बीस ग्राम की मात्रा में ग्रहण कर क्राथविधि से क्राथ बनाकर पांच दिन तक इनका वर्षाकाल में प्रयोग करना चाहिये। इससे वर्षाकाल में उत्पन्न होने वाला ज्वर नहीं होता और पित्त का सञ्चय भी नहीं होता।

11. केवल गुडूची स्वरस का भी पन्द्रह मिलिलीटर की मात्रा में प्रयोग दस दिन तक करना चाहिये।

# संस्कृतसमाचाराः

## 'भारती' पत्रिकायाः सम्मानः

जयपुरतः 1950 खीष्टाब्दतो '**भारती**' संस्कृत-मास-पत्रिका निरन्तरं प्रकाश्यते। 72 वर्षाणि प्रायेण सम्पूर्णानि। लब्धप्रतिष्ठाः स्वामि-सुरजनदास-भट्टमथुरानाथसदृशा विद्वांसोऽस्याः सम्पादकाः, प्रधानसम्पादकाः सहसम्पादकाश्चाभूवन्, सम्पादयन्ति च। अनवरतं प्रकाशिता संस्कृतमासपत्रिकेयं '**भारती**' सम्पूर्णेऽपि भारतवर्षे प्राचीनतमा पत्रकारिताक्षेत्रे महनीयं योगदानं प्रदत्तवती। एतदाकलय्य 11.08.2022 तमे दिनाङ्के **केन्द्रीयसंस्कृत-विश्वविद्यालयेन** (दिल्लीस्थेन) संस्कृतसप्ताहान्तर्गत-कार्यक्रमेषु पत्रिकेयं **एकलक्षरूप्यक**राशिप्रदानपुरस्सरं **प्रशस्तिपत्रेण** सभाजिता। 'भारती' पत्रिकायाः सम्पादकः प्रोफेसर **(डॉ.) श्रीकृष्णशर्मा**, प्रबन्धकसम्पादकः **श्रीसुदामाशर्मा**-उभावेतावपि तत्र सम्मानितौ। सम्मानकर्तारो मञ्चस्था आसन् -

1. आचार्यः **(डॉ.)श्रीनिवास-बरखेडी** (कुलपतिः, केन्द्रीय-संस्कृतविश्वविद्यालयः, दिल्ली)
2. आचार्यः **(डॉ.)मुरलीमनोहरपाठकः** (कुलपतिः, श्रीलालबहादुरशास्त्री-केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली)
3. **डॉ. सुभाष सरकारः** (शिक्षाराज्यमन्त्री, केन्द्र-सर्वकारः)
4. **श्री दिनेश कामतः** (संघटनमन्त्री, संस्कृतभारती)।



## आजीवनं संस्कृतसेवालङ्करणसम्मानः

स्वतन्त्रताया अमृतमहोत्सवावसरे '**राजस्थान-संस्कृत-अकादमी**' द्वारा 'राज्यस्तरीयः संस्कृत-दिवस-समारोहः' 13.08.2022 दिनाङ्के अकादमी-सभागारे कला-संस्कृति एवं संस्कृतशिक्षामन्त्रिणां **डॉ.बुलाकीदासकल्ला**-महोदयानां मुख्यातिथ्ये समायोजितः। अस्मिन् अवसरे वेदविषयकं विशिष्टव्याख्यानद्वयं सञ्जातम्- 1. '**वेदाः विश्वञ्च**' (विशिष्टवक्ता-प्रोफेसर (डॉ.) **विजयशङ्कर-शुक्लः**, क्षेत्रीयनिदेशकः, इन्दिरा गाँधी राष्ट्रीय-कला-केन्द्रम्, वाराणसी)। 2. '**वेदेषु राष्ट्रियता**' (विशिष्टवक्ता प्रोफेसर (डॉ.) **श्रीकृष्णशर्मा** संस्कृतविभागाध्यक्षचरः, जयनारायणव्यासविश्वविद्यालयः, जोधपुरम्, '**स्वरमंगला**'- '**भारती**'संस्कृतपत्रिकयोः **सम्पादकः**)।

अग्रेलिखितानां विशिष्टसंस्कृतविदुषाम् '**आजीवनं संस्कृतसेवालङ्करणम्**' इत्यनेन सम्मानो विहितः- **डॉ. नारायणशास्त्री काङ्करः** (राष्ट्रपतिसम्मानितः), **पण्डित-अनन्त शर्मा, पण्डित- रामपालशर्मा, पण्डित-प्यारेमोहनशर्मा, देवर्षि-कलानाथशास्त्री** (राष्ट्रपति-सम्मानितः), राष्ट्रपतिसम्मानित आचार्य**दयानन्दभार्गवः**, **डॉ.राजेश्वरी भट्टः**, **डॉ. मोहनलालगुप्तः**, राष्ट्रपतिसम्मानितो **डॉ.बनवारीलालगौडः**, राष्ट्रपतिसम्मानितो **डॉ. गणेशीलालसुथारः**, आचार्यः **डॉ.श्रीकृष्णशर्मा**। भामाशाहरूपेण प्रसिद्धः शिक्षाविद् **श्री बजरंगलाल-तापडियाः**। सम्मान एषः **डॉ.बी.डी.कल्ला** (संस्कृतशिक्षामन्त्री) महोदयानां करकमलैः सञ्जातः।

राजस्थानसंस्कृतशिक्षा-विभागेन 12.08.2022 दिनाङ्के समायोजिते संस्कृतदिवस-समारोहेऽपि एते विद्वांसः प्रमुखपुरस्कारैः सभाजिताः -

1. **डॉ. बनवारीलाल गौडः** ('शिखर' सम्मानेन सभाजितः)
2. **डॉ. ताराशंकरशर्मा** ('साधना' पुरस्कारेण सभाजितः)
3. **डॉ. रामदेव साहूः** ('साधना' पुरस्कारेण सभाजितः)

– सुदामा शर्मा, प्रबन्धसम्पादकः



प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालवाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७१०१४

प्रतिष्ठायाम्,